'कौल-कल्पतरु'
चण्डी

# श्री श्रीविद्या-साधना

## श्रीषोडशी-आराधना

पुष्प ४

प्रकाशक : परा-वाणी आध्यात्मिक शोध-संस्थान
श्रीचण्डी-धाम, अलोपी-देवी मार्ग, प्रयाग-२११००६

# श्रीषोडशी-आराधना

- जगत्–**भगवती षोडशी** की क्रीड़ा अथवा कौतुक से उत्पन्न रङ्ग-मञ्च है। '**श्री षोडशी-सहस्त्र-नाम**' में इसीलिए **भगवती षोडशी** को–'**जगन्माता**', '**जगत्-प्रिया**', '**जगत्-सारा**', '**जगद्-भवा**', '**जन्म-दायिनी**', '**विश्व-नाथा**', '**विश्वात्मिका**', '**विश्व-माता**', '**विश्व-जननी**', '**विश्वाख्या**', '**विश्व-वर्द्धिनी**' कहा गया है। अतएव जगत् में **भगवती षोडशी की आराधना–सर्व-श्रेष्ठ आराधना** है, इसमें सन्देह नहीं।

- जगत् में **भगवती षोडशी–पर-ब्रह्म शिव** के साथ सदा-सर्वदा विराजमान हैं। उन्हें–'**शिवाराध्या**', '**शिव-नाथा**', '**शिव-प्रिया**', '**शिव-माता**', '**शिवाख्या**', '**शिव-दा**', '**शिव-रूपिणी**', '**शङ्कर-वल्लभा**', '**शिव-शक्ति-मयी शक्ति**' कहा गया है। उनकी आराधना के द्वारा **पर-ब्रह्म शिव** अर्थात् महा-प्रकाश की दिव्य अनुभूति होती है।

- **भगवती षोडशी–पर-ब्रह्म शिव** की **अत्यन्त स्वतन्त्र** '**सृजन**'-**शक्ति** हैं। वे '**आनन्द**', '**कौतुक**' हेतु सृष्टि करती हैं। '**श्री षोडशी-सहस्त्र-नाम**' में उनके लिए '**महा-स्पन्देश्वरी**', '**सुधा**', '**सदा कौतूहल-प्रिया**', '**जगदानन्द-सम्भूता**' आदि '**नाम**' कहे गए हैं। अतएव उनकी आराधना के द्वारा सृष्टि के **वास्तविक आनन्द** की अनुभूति होती है।

- **भगवती षोडशी** अपनी '**माया**'-**शक्ति** द्वारा जीवों को '**बन्धन**' में डालती हैं और वे ही '**महा-माया**', '**गुरु**'- रूप में '**मुक्ति**' प्रदान करती हैं। अतएव उन्हें–'**महा-लोभा**', '**महा-मोहा**', '**सर्व-संहार-वर्णेशी**' भी कहा जाता है और साथ-ही-साथ–'**विश्व-पाश-विनाशिनी**', '**महा-पातक-नाशिनी**', '**महा-किल्विष-नाशिनी**', '**भव-भार-विनाशिनी**', '**सद्-गुरु-लोचना**' आदि-आदि भी कहा जाता है। संक्षेप में एक-मात्र **भगवती षोडशी की आराधना** द्वारा ही वास्तविक रूप से '**मुक्ति**' पाई जा सकती है।

- **भगवती षोडशी की आराधना** से सभी प्रकार की सिद्धि की प्राप्ति होती है। '**श्री षोडशी-सहस्त्र-नाम**' में इस तथ्य को स्पष्ट करने के लिए उन्हें–'**सिद्ध-सागरा**', '**सिद्ध-लक्ष्मी**', '**सिद्ध-विद्या**', '**सिद्धा**', '**सिद्धेश्वरी**' आदि कहा गया है।

'कौल-कल्पतरु' चण्डी की विशेष प्रस्तुति

वर्ष-६९

# श्री श्रीविद्या-साधना

( श्री श्रीविद्या-स्तव-मञ्जरी ) पुष्प-४

# श्रीषोडशी-आराधना

प्रेरणा-स्तम्भ

प्रातः-स्मरणीय 'कुल-भूषण' पं० रमादत्त शुक्ल

सम्पादक

ऋतशील शर्मा

★

प्रकाशक

पण्डित देवीदत्त शुक्ल स्मारक

परा-वाणी आध्यात्मिक शोध-संस्थान

कल्याण मन्दिर प्रकाशन

श्रीचण्डी-धाम, प्रयाग-राज-२११००६ ☎ ९४५०२२२७६७

Website : www.paravani.org Email : chandi_dham@rediffmail.com

अनुदान ४०/-

प्रकाशक

पण्डित देवीदत्त शुक्ल स्मारक

**परा-वाणी आध्यात्मिक शोध-संस्थान**

कल्याण मन्दिर प्रकाशन

श्रीचण्डी-धाम, प्रयाग-राज-२११००६ ☎ ९४५०२२२७६७

## श्रद्धाञ्जलि!

जिनकी '**दिव्य कृपा**' से

प्रस्तुत **श्री श्रीषोडशी-आराधना** का प्रकाशन हो रहा है

**गुप्तावतार**
**बाबाश्री**



**राष्ट्र-गुरु**
**स्वामी जी महाराज**

**कौल-कल्पतरु**
**पं० देवीदत्त शुक्ल**

**कुल-भूषण**
**पं० रमादत्त शुक्ल**

तृतीय संस्करण

आषाढ़ कृष्णा अष्टमी ( शीतला अष्टमी ) , शोभन सं० २०६७ वि०-०४ जुलाई, २०१०

**सर्वाधिकार सुरक्षित**

**परा-वाणी प्रेस**, अलोपी-देवी मार्ग, प्रयाग-राज (उ०प्र०)

# अनुक्रम

बालार्क - मण्डलाभासां, चतुर्बाहां त्रि - लोचनाम् ।
पाशांकुश - शरांश्चापं, धारयन्तीं शिवां भजे ।।

अर्थात् भगवती श्रीषोडशी के शरीर की कान्ति बाल-सूर्य-मण्डल की कान्ति के समान है। वे चतुर्भुजा और त्रि-नेत्रा हैं। चारों हाथों में १. पाश, २. अंकुश, ३. शर (बाण) और ४. चाप (धनुष)–ये चार अस्त्र धारण किए हैं। ऐसी शिवा का मैं भजन करता हूँ।


०१. प्राक्कथन ..... १४०
०२. जय श्रीषोडशी विद्या माँ ..... १४२
०३. श्रीषोडशी-कवच-स्तोत्र-साधना ..... १४३
०४. श्रीषोडशी-कवच-स्तोत्र-साधना ( हिन्दी-रूपान्तर ) ..... १४४
०५. श्रीतुरीया-षोडशी-त्रैलोक्य-विजय-कवच-स्तोत्र-साधना ..... १४७
०६. श्रीतुरीया-षोडशी-त्रैलोक्य-विजय-कवच-स्तोत्र-साधना ( हिन्दी ) .... १५३
०७. श्रीषोडशी-कवच-साधना ..... १५७
०८. श्रीषोडशी-कवच-साधना ( हिन्दी-रूपान्तर ) ..... १५९
०९. श्रीपरा-महा-योनि-कवच-साधना ..... १६१
१०. श्रीषोडशी-हृदय-स्तोत्र-साधना ..... १६४
११. श्रीषोडशी-अष्टोत्तर-शत-नाम-स्तोत्र-साधना ..... १६६
१२. श्रीषोडशी-अष्टोत्तर-शत-नामावली-जप-साधना ..... १६८
१३. श्रीषोडशी-सहस्त्र-नाम-स्तोत्र-साधना ..... १६९
१४. श्रीषोडशी-सहस्त्र-नामावली-जप-साधना ..... १८५
१५. श्रीराज-राजेश्वरी-तर्पण-स्तोत्र-साधना ..... २०३
१६. श्रीचक्र-स्तोत्रम् ..... २०६
१७. श्री-आवरण-सहस्त्राक्षरी-साधना ..... २०७


★★★

# प्राक्कथन

'**चण्डी**' आध्यात्मिक पुस्तक-माला के अन्तर्गत **श्री श्रीविद्या-साधना** का क्रमशः प्रकाशन हो रहा है। पुष्प (१)-(३) के द्वारा **भगवती श्रीबाला-त्रिपुर-सुन्दरी** एवं **भगवती श्रीललिता-त्रिपुर-सुन्दरी** की आराधना हेतु '**कवच**', '**हृदय**', '**अष्टोत्तर-शत-नाम**' एवं '**स्तोत्रादि**' प्रकाशित हुए। अब पुष्प (४) के द्वारा **श्री श्रीविद्या-साधना** के अन्तिम चरण **श्रीषोडशी-आराधना** हेतु '**कवचादि**' प्रकाशित किए जा रहे हैं।



प्रस्तुत '**श्रीषोडशी-आराधना**' में गुप्तावतार **बाबा श्री** के दुर्लभ संग्रह के आधार पर पहली बार '**श्रीषोडशी-सहस्त्र-नाम**' पूर्ण-रूप में, '**नामावली**'-सहित मोटे-मोटे अक्षरों में प्रकाशित हो रहा है। आशा है कि **श्री श्रीविद्या की आराधना** करने के इच्छुक बन्धुओं को इससे विशेष लाभ होगा।

'**तन्त्रों**' में **पञ्च-वक्त्र शिव** की शक्ति का नाम '**षोडशी**' है। '**कार्य**'-भेद से **भगवान् शिव** के अनेक रूप होते हैं। जब **शिव**– पाँच दिशाओं में व्याप्त होते हैं, तो वे '**पञ्च-मुख**' कहलाते हैं। उनके **पाँचों मुख**–१. पूर्व, २. पश्चिम, ३. उत्तर, ४. दक्षिण और ५. ऊर्ध्व 'दिग्'-भेद से क्रमशः **१. तत्पुरुष, २. सद्योजात, ३. वामदेव, ४. अघोर** और **५. ईशान** नाम से प्रसिद्ध हैं। ये **पाँचों**

मुख क्रमशः १. चतुष्कल, २. अष्ट-कल, ३. त्रयोदश-कल, ४. अष्ट-कल और ५. पञ्च-कल हैं। साथ ही, पाँचों क्रमशः १. हरित ( हरा ), २. रक्त, ३. धूम्र, ४. नील और ५. पीत-वर्ण हैं।

इनके **दस हाथ** हैं। दसों हाथों में– १. **अभय**, २. टङ्क ( कुठार ), ३. शूल, ४. वज्र, ५. पाश, ६. खड्ग, ७. अंकुश, ८. घण्टा, ९. नाग और १०. अग्नि– ये दस आयुध हैं। ये **'पञ्च-वक्त्र शिव'–सर्वज्ञ, त्र्यक्ष-रूप, अनादि-बोध स्वरूप, स्वतन्त्र** और **अनन्त** शक्तिमान् हैं। पाँचों दिशाओं में इनकी व्याप्ति होती है और पाँचों दिशाओं को ये देखते हैं।

इन्हीं **'पञ्च-वक्त्र शिव'** की शक्ति का नाम **'षोडशी'** है। **'तन्त्रों'** में ये **'महा-त्रिपुर-सुन्दरी'**, **'श्री श्रीविद्या'** से विख्यात हैं। इनका तन्त्रोक्त स्वरूप इस प्रकार है–

**बालार्क-मण्डलाभासां, चतुर्बाहां त्रि-लोचनाम् ।**
**पाशांकुश-शरांश्चापं, धारयन्तीं शिवां भजे ।।**

**'सूर्य'** में १. **ताप** ( अग्नि ) है, २. **प्रकाश** है, ३. **आहुत सोम** ( चन्द्रमा ) है। **'त्रीणि ज्योतिषि स च ते स षोडशी'** के अनुसार **षोडशी भगवती** ने इन्हीं तीन रूपों से विश्व को प्रकाशित कर रक्खा है। इसलिए वे **'त्रि-लोचना'** हैं।

**'सोम'** की आहुति से वे शान्त हैं। अतः **प्रातः-काल का बाल-सूर्य ( बालार्क )** आपकी साक्षात् प्रकृति है।

**'सूर्य'** से उत्पन्न होनेवाली प्रजा सौर-शक्ति से आबद्ध रहती है। **'सौर-शक्ति'** आकर्षक-रूप से सभी को आबद्ध करती है, अतएव **भगवती षोडशी** के हाथों में **'पाश'** है।

अक्षर-रूपा नियति के भय से सभी अपना कार्य करते हैं। स्वयं **'सूर्य'** भी उससे नियन्त्रित हैं। अतएव **भगवती** के हाथों में **'अंकुश'** है।

जो स्पर्धा के कारण **परमा शक्ति–भगवती षोडशी** के अटल नियमों का उल्लङ्घन करते हैं, उनका वे नाश कर डालती हैं। १. **'पृथ्वी'**, २. **'अन्तरिक्ष'**, ३. **'द्यौ'**–इन तीनों लोकों में व्याप्त अन्न, वायु और वर्षा–ये तीन प्रकार के **'इषु'** (वाण) हैं। इन्हीं **'इषुओं'**–वाणों द्वारा वे संहार करती हैं।

१. सृष्टि-कर्त्ता **'ब्रह्मा'**, २. पालन-कर्त्ता **'विष्णु'**, ३. संहार-कर्त्ता **'रुद्र'**, ४. खण्ड प्रलय के अधिष्ठाता **'यम'**–चारों देवता आपके आधीन हैं। आप पर वे प्रतिष्ठित हैं।

इस प्रकार **भवगती षोडशी–सर्व-सिद्धि-दात्री** हैं। आपकी कृपा से साधकों को **'सर्व-सिद्धि'** प्राप्त होती है। आपके **चारों हाथ आयुधों से भरे हैं। 'अभय'** और **'वर'-मुद्रा** नहीं है। **'अभय'** व **'वर'-मुद्रा** का कार्य आपके **'चरण-कमल'** से अर्थात् आपकी **आराधना** से ही होता है।

अस्तु! आशा ही नहीं अपितु पूर्ण विश्वास है कि प्रस्तुत **श्रीषोडशी-आराधना** द्वारा श्रद्धालु बन्धु **भगवती श्रीषोडशी की आराधना** करेंगे और अपना तथा **विश्व का कल्याण** करेंगे।

**श्रीचण्डी-धाम, प्रयाग** **–ऋतशील शर्मा**

# जय षोडशि विद्या माँ

त्रिपुर-सुन्दरी माँ, जय षोडशि विद्या माँ,
जग-कारिणि-पालिनि पर-ब्रह्म सनातनि माँ,
त्रिपुर-सुन्दरी माँ० ।।

कामाकर्षिणि पड़वे, बुद्ध्याकर्षणि माँ,
बीजी नित्या बीजे, अमरुत-वर्षणि माँ,
त्रिपुर-सुन्दरी माँ० ।।

अहङ्कार-आकर्षिणि, त्रीजी नित्या माँ,
त्रीजे पूजन करता, त्रीजी पद्धति माँ,
त्रिपुर-सुन्दरी माँ० ।।

शब्दाकर्षिणि चोथे गणप चतुर्थी माँ,
चन्द्र-कला कमिनीया, पर-पद-दायिनि माँ,
त्रिपुर-सुन्दरी माँ ।।

रूपाकर्षिणि पञ्चमि, जग-सञ्चालिनि माँ,
दिव्य सुरासुर मानव, जन-मन-रञ्जनि माँ,
त्रिपुर-सुन्दरी माँ० ।।

स्पर्शाकर्षिणि षष्ठी, भाग्य-विधायिनि माँ,
भक्त-जन-प्रिय माता, जगदुद्धारिणि माँ,
त्रिपुर-सुन्दरी माँ० ।।

सप्तमि रस-आकर्षिणि, विश्व-विनोदिनि माँ,
स्वाद अमर-फल दायिनि, सुरस सुधा-सर माँ,
त्रिपुर-सुन्दरी माँ० ।।

अष्टमि गन्धाकर्षिणि, पुष्प-धराधरि माँ,
सर्वारम्भ क्रिया करि, शुचि शशि-धर-सरि माँ,
त्रिपुर-सुन्दरी माँ० ।।

नवमी चित्ताकर्षिणि, नव-नव दुर्गा माँ,
शक्ति परापर मालिनि, भव-तारिणि भव माँ,
त्रिपुर-सुन्दरी माँ० ।।

धैर्याकर्षिणि नित्या, रणदुर्द्धर्षिणि माँ,
दशमी धीरज-दायिनि, जय-दायिनि जय माँ,
त्रिपुर-सुन्दरी माँ० ।।

स्मृत्याकर्षिणि स्पर्शिनि, दर्शन दर्शिनि माँ
एकादशि तवर्तिनि निज पद-दायिनि माँ,
त्रिपुर-सुन्दरी माँ० ।।

भासाकर्षिणि भंव-भय भक्त-निवारिणि माँ,
द्वादशि परिमाणु-ध्वज, विश्व-विहारिणि माँ,
त्रिपुर-सुन्दरी माँ० ।।

बीजाकर्षिणि अक्षर गति विस्फोटिनि माँ,
तत्त्व-अनन्त-विकासिनि, तेरश, तेरश माँ,
त्रिपुर-सुन्दरी माँ० ।।

चौदश अमृताकर्षिणि, दिव्य दरश-धर माँ,
ताप-त्रिताप-निवारिणि, भग-मालिनि, भग माँ,
त्रिपुर-सुन्दरी माँ० ।।

पूनम देहाकर्षिणि, नृत्य कला-धरि माँ,
स्थूल जगत-कर कारिणि, जग-धारिणि जग माँ,
त्रिपुर-सुन्दरी माँ० ।।

अमा समा रस पूर, सर्वाकर्षिणि माँ, विश्वाकर्षिणि माँ,
पूरण दल-पर षोडशि, कृष्ण सनातनि माँ,
त्रिपुर-सुन्दरी माँ० ।।

पंदर तिथि नित्या-गति, शक्ति अपर परमा,
'मोति' कला-धर भय-हर, विश्वम्भर-सर माँ,
त्रिपुर-सुन्दरी माँ० ।।

त्रिपुर-सुन्दरी माँ, जय षोडशि विद्या माँ,
जग-कारिणि-पालिनि पर-ब्रह्म, सनातन माँ,
त्रिपुर-सुन्दरी माँ० ।।

–गुप्तावतार बाबाश्री

★★★

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीषोडशी-कवच-स्तोत्र-साधना

।। पूर्व-पीठिका—श्रीदेव्युवाच ।।

देव-देव! महा-देव!, भक्तानां प्रीति-वर्द्धनम्।
सूचितं यन् महा-देव्याः, कवचं कथयस्व मे ।।१।।

।। श्रीमहा-देव उवाच ।।

शृणु देवि! प्रवक्ष्यामि, कवचं देव-दुर्लभम्।
न प्रकाश्यं परं गुह्यं, साधकाभीष्ट-सिद्धिदम् ।।२।।

कवचस्य ऋषिर्देवि!, दक्षिणा-मूर्तिरव्ययः।
छन्दः पंक्तिः समुद्दिष्टं, देवी त्रिपुर-सुन्दरी ।।३।।

धर्मार्थ-काम-मोक्षाणां, विनियोगस्तु साधने।
वाग्भवः काम-राजश्च, शक्ति-वीजं सुरेश्वरि!।।४।।

।। कवच-स्तोत्रम् ।।

वाग्भवः पातु शीर्षे मां, काम-राजस्तथा हृदि।
शक्ति-बीजं सदा पातु, नाभौ गुह्ये च पादयोः ।।१।।

ऐं क्लीं सौः वदने पातु, बाला मां सर्व-सिद्धये।
ह्सौः हसकलह्रीं पातु, भैरवी कण्ठ-देशतः ।।२।।

सुन्दरी नाभि-देशे च, शीर्षे काम-कला सदा।
भ्रू-नासयोरन्तराले, महा-त्रिपुर-सुन्दरी ।।३।।

ललाटे सुभगा पातु, भगा मां कण्ठ-देशतः।
भगोदया च हृदये, उदरे भग-सर्पिणी ।।४।।

भग-माला नाभि-देशे, लिङ्गे पातु मनोभवा।
गुह्ये पातु महा-देवी, राज-राजेश्वरी शिवा ।।५।।

चैतन्य-रूपिणी पातु, पादयोर्जगदम्बिका।
नारायणी सर्व-गात्रे, सर्व-कार्ये शुभङ्करी ।।६।।

ब्रह्माणी पातु मां पूर्वे, दक्षिणे वैष्णवी तथा।
पश्चिमे पातु वाराही, उत्तरे तु महेश्वरी ।।७।।

आग्नेयां पातु कौमारी, महा-लक्ष्मीस्तु नैर्ऋते।
वायव्यां पातु चामुण्डा, इन्द्राणी पातु ईशके ।।८।।

जले पातु महा-माया, पृथिव्यां सर्व-मङ्गला।
आकाशे पातु वरदा, सर्वत्र भुवनेश्वरी ।।९।।

।। फल-श्रुति ।।

इदं तु कवचं देव्या, देवानामपि दुर्लभम्।
पठेत् प्रातः समुत्थाय, शुचिः प्रयत-मानसः ।।१।।
नाधयो व्याधयस्तस्य, न भयं च कश्चिद् भवेत्।
न च मारी-भयं तस्य, पातकानां भयं तथा ।।२।।
न दारिद्र्य-वशं गच्छेत्, तिष्ठेन्मृत्यु-वशे न च।
गच्छेच्छिव-पुरं देवि!, सत्यं सत्यं वदाम्यऽहम् ।।३।।
इदं कवचमज्ञात्वा, श्रीविद्यां यो जपेत् सदा।
स नाप्नोति फलं तस्य, प्राप्नुयाच्छस्त्र-घातनम् ।।४।।

।। सिद्ध-यामले श्रीषोडशी-कवचम् ।।

★★★

॥ श्रीमहा-त्रिपुर-सुन्दरी को नमस्कार॥

## श्रीषोडशी-कवच-स्तोत्र-साधना (हिन्दी-रूपान्तर)

।। पूर्व-पीठिका ।।

**श्री देवी** ने कहा–**हे देव-देव महा-देव**! तुम भक्त-वृन्द की प्रीति बढ़ाते रहते हो, इसलिए तुमने पहिले जो **महा-देवी** के **कवच** का उल्लेख किया था, उसे अब कहो ।।१।।

**श्रीमहा-देव** ने कहा–**हे देवि**! उस **मन्त्र-मूर्ति कवच** को मैं कहूँगा, सुनो। इस **कवच** से सब प्रकार की इष्ट-सिद्धियाँ मिलती हैं। यह **कवच** गोपनीय वस्तु है, इसे प्रकट नहीं करना चाहिए ।।२।।

इस **कवच** के ऋषि **अव्यय दक्षिणामूर्ति** हैं, छन्द **पंक्ति** है, इसकी देवी **त्रिपुर-सुन्दरी** हैं, वाग्भव **'ऐं'** बीज है, **'सौः'** शक्ति है, काम-राज **'क्लीं'** कीलक और **धर्म, अर्थ, काम** तथा **मोक्ष** इस चतुर्वर्ग के साधन में इसका विनियोग है ।।३-४।।

।।कवच-स्तोत्र।।

वाग्भव **'ऐं'** मेरे मस्तक की रक्षा करें। काम-राज वीज **'क्लीं'** हृदय की रक्षा करें। शक्ति-बीज **'सौः'** नियत रूप में मेरी नाभि, गुह्य और दोनों पैरों की रक्षा करें ।।१।।

**'ऐं क्लीं सौः'**- ये **त्रि-बीज-रूपिणी बाला** सब सिद्धियाँ प्रदान कर मेरी रक्षा करें। **'हसौः' 'हसकलह्रीं'**,-ये बीज-रूपिणी **भैरवी** मेरे कण्ठ-देश की रक्षा करें ।।२।।

**'सुन्दरी'** मेरी नाभि की और **'काम-कला'** मेरे शीर्ष-देश की रक्षा करें।

**'महा-त्रिपुर-सुन्दरी'** भौहों और नासिका के मध्य-स्थल की, **'सुभगा'** ललाट की, **'भगा'** कण्ठ की और **'भगोदया'** हृदय की, **'भग-सर्पिणी'** उदर की रक्षा करें।। ३-४।।

**'भग-माला'** नाभि-देश की और **'मनोभवा'** मेरे लिङ्ग की रक्षा करें। **'महा-देवी राज-राजेश्वरी शिवा'** मेरे गुह्य-देश की और **'चैतन्य-रूपिणी जगदम्बिका'** मेरे पाद-युगल की रक्षा करें। **'नारायणी'** मेरे सर्वाङ्ग की और सब कामों में **'शुभङ्करी'** रक्षा करें ।।५-६।।

**'ब्रह्माणी'** पूर्व दिशा में और **'वैष्णवी'** दक्षिण दिशा में मेरी रक्षा करें। **'वाराही'** पश्चिम दिशा में, **'माहेश्वरी'** उत्तर दिशा में, **'कौमारी'** अग्नि-कोण में और **'महा-लक्ष्मी'** नैर्ऋत-कोण में मेरी रक्षा करें। **'चामुण्डा'** वायु-कोण में और **'इन्द्राणी'** ईशान-कोण में मेरी रक्षा करें। जल में **'महा-माया'**, पृथ्वी पर **'सर्व-मङ्गला'**, **'वरदा'** आकाश में और **'भुवनेश्वरी'** सब स्थानों में मेरी रक्षा करें ।।७-९।।

।। फल-श्रुति।।

**देवी** का यह कवच **देव-वृन्द** को भी दुष्प्राप्य है। **प्रभात-काल** में जगकर पवित्र-भाव से **एकाग्र-मन** होकर इसका पाठ करना चाहिए ।।१।।

इस **कवच** के पाठ के फल से **आधि-व्याधि** नहीं रहतीं और कहीं भी **भय** नहीं होता। पाठ-कर्ता के **मारी-भय** और सब प्रकार के **पातकों के भय** नहीं रहते ।।२।।

इस **कवच** का पाठ-कर्ता **दारिद्र्य** के वश में नहीं आएगा, वह **मृत्यु-मुख** में कभी नहीं पड़ेगा। **हे देवि**! वह व्यक्ति **शिव-धाम** को जाएगा, यह मैं तुमसे सर्वथा सत्य कह रहा हूँ ।।३।।

इस **कवच** को न जानकर जो व्यक्ति **श्री-विद्या** के मन्त्र का जप करता है, वह जप का फल नहीं पाता, ऊपर से **अस्त्र-घात** को प्राप्त होता है ।।४।।

## भगवती षोडशी की आराधना

**सुधा-सिन्धु के मध्य, कल्प-वृक्षों की वाटी से वेष्टित-**
**मणि-द्वीप में नीप-वनों के चिन्तामणि-गृह में सज्जित-**
**शिवाकार-मञ्च-स्थित पर-शिव-पर्यङ्कोपरि शोभा-वान।**
**चिदानन्द-लहरी, तुमको हैं भजते कोई धन्य सुजान।।**

थोड़े से ही भाग्यवान् हैं, जो '**चित्**' और '**आनन्द**' की धारा-रूपिणी, **अमृत-सागर** के मध्य में '**मणि-द्वीप**' में अलौकिक **वृक्षों के उद्यान** से वेष्टित और **उपवन** से युक्त '**चिन्तामणि**'-गृह में '**परम शिव-रूपी**' **पंलग** पर बैठी हुई तुमको भजते हैं।

# श्रीमहाकामेश्वर-सहिता भगवती श्रीपराम्बा



बालार्कायुत-तेजसं त्रि-नयनां रक्ताम्बरोल्लासिनीम् ।
नानालंकृति-राजमान-वपुषं बालोडुराट्-शेखराम् ।।
हस्तैरिक्षु-धनुः सृणिं सुमशरं पाशं मुदा विभ्रतीम् ।
श्रीचक्र-स्थित-सुन्दरीं त्रि-जगतामाधार-भूतां स्मरेत् ।।
बालार्क-मण्डलाभासां, चतुर्बाहां त्रि-लोचनाम् ।
पाशांकुश - शरांश्चापं, धारयन्तीं शिवां भजे ।।

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीतुरीया-षोडशी-त्रैलोक्य-विजय-कवच-स्तोत्र-साधना

।। पूर्व-पीठिका ।।

कैलास-शिखरे रम्ये, देव-देवं जगद्-गुरुम् ।
शङ्करं परि-पप्रच्छ, कुमारः शिखि-वाहनः ।।१।।

।। श्रीस्कन्द उवाच ।।

जनक, श्रीगुरो, देव, पुत्र-वात्सल्य-वर्धन! ।
कवचं षोडशाक्षर्या, वद मे परमेश्वर! ।।२।।

।। श्रीईश्वर उवाच ।।

शृणु पुत्र महा-भाग!, कवचं मन्त्र-विग्रहम् ।
गोप्याद् गोप्यतरं गोप्यं, गुह्याद् गुह्य-तरं महत् ।।३।।

तव स्नेहात् प्रवक्ष्यामि, नाख्यातं यस्य कस्यचित् ।
ब्रह्मेश-विष्णु-शक्रेभ्यो, मया न कथितं पुरा ।।४।।

देवाग्रे नैव दैत्याग्रे, न शौनक-गुणाग्रके ।
तव भक्त्या तु कवचं, गोप्यं कर्तुं न शक्यते ।।५।।

एकादश-महा-विद्या, स-वर्णा सद्-गुणान्विता ।
सर्व-शक्ति-प्रधाना हि, कवचं मन्मुखोदितम् ।।६।।

गणेशश्च रविर्विष्णुः, शिव-शक्तिश्च भैरवः ।
पञ्च-तत्त्वादि-सर्वेषां, वर्मावर्तेन तुष्यताम् ।।७।।

ऊर्ध्वाम्नायं महा-मन्त्रं, कवचं निर्मितं मया ।
त्रैलोक्य-विजयं दिव्यं, तुरीयं कवचं शुभम् ।।८।।

।। श्रीस्कन्द उवाच ।।

कवचं परमं देव्याः, श्रोतुमिच्छाम्यऽहं प्रभो! ।
यत्-सूचितं त्वया पूर्वं, धर्म-कामार्थ-मोक्षदम् ।।९।।

तद्-विनाऽऽराधनं नास्ति, जपं ध्यानादि-कर्मणि ।
तस्याश्च कवचं यस्मात्, तस्मात् तद् वद मे प्रभो ।।१०।।

।। श्रीईश्वर उवाच ।।

शृणु पुत्र महा-प्राज्ञ!, रहस्याति-रहस्यकम् ।
तुरीयं कवचं दिव्यं, सर्व-मन्त्र-मयं शुभम् ।।११।।

पूजान्ते तु जपात्-पूर्वं, कवचं समुदीरयेत् ।

।। विनियोग ।।

अस्य श्रीकवचस्यास्य, ऋषिरानन्द-भैरवः ।।१२।।

श्रीविद्या देवताश्छन्दो, गायत्री-रुचि-वृत्तिकम् ।

रमा-बीजं परा-शक्तिः, वाग्भवं कीलकं स्मृतम् ।।१३।।

मम सर्वार्थ-सिद्ध्यर्थे, जपे तु विनियोगतः ।

।। कर-न्यास ।।

अंगुष्ठाग्रे वाग्भवं च, हृल्लेखां तर्जनी न्यसेत् ।।१४।।

लक्ष्मी-वीजं मध्यमायामङ्गिराऽनामिका तथा ।

परा-बीजं कनिष्ठायां, लक्ष्मीं कर-तले न्यसेत् ।।१५।।

।। षडङ्ग-न्यास ।।

हृदये वाग्भवं न्यस्यात्, परां शिरसि च न्यसेत् ।

लक्ष्मी-बीजं शिखायां च, कवचे वाग्भवं न्यसेत् ।।१६।।

हृल्लेखां नेत्रयोर्न्यस्यादस्त्रं तु कमलां न्यसेत् ।

।। दिग्-बन्धन ।।

भूर्भुवः स्वरिति मनुना दिग्-बन्धनमाचरेत् ।।१७।।

ध्यानं तस्य प्रवक्ष्यामि, धर्म-कामार्थ-मोक्षदम् ।

न्यास-ध्यानादिकं सर्वं, कृत्त्वा तु कवचं पठेत् ।।१८।।

।। ध्यान ।।

क्षीर-सागर-मध्यस्थे, रत्न-द्वीपे मनोहरे ।

रत्न-सिंहासने दिव्ये, तत्र देवीं विचिन्तयेत् ।।१९।।

कोटि-सूर्य-प्रतीकाशां, चन्द्र-कोटि-निभाननाम् ।

दाडिमी-पुष्प-सङ्काशां, कुंकुमोदर-सन्निभाम् ।।२०।।

जपा-कुसुम-सङ्काशां, त्रिनेत्रां च चतुर्भुजाम् ।

पाशांकुश-धरां रम्यामिक्षु-चाप-शरान्विताम् ।।२१।।

कर्पूर-शकलोन्मिश्र-ताम्बूल-पूरिताननाम् ।

सर्व-शृङ्गार वेषाढ्यां, सर्वावयव-शोभिनीम् ।।२२।।

सर्वायुध-समायुक्तां , प्रसन्न-वदने क्षणाम् ।

सपरिवार-सावरणां सर्वोपचारार्चिताम् ।।२३।।

एवं ध्यायेत् ततो वीर!, कवचं सर्व-कामदम् ।
आवर्तयेत् स्व-देहे तु, सर्व-रक्षा-करं शुभम् ।।२४।।

।। कवच-पाठ ।।

शिखायां मे 'ह्सौः' पातु,'स्हौ' मे पातु ब्रह्मरन्ध्रके ।
सर्वदा 'ह्रौं' च मां पातु, वाम-दक्षिण-भागयोः ।।१।।
'ऐं ह्रीं श्रीं' सर्वदा पातु, षोडशी सुन्दरी परा ।
'श्रीं ह्रीं क्लीं' सर्वदा पातु, 'ऐं सौं ॐ' पातु मे सदा ।।२।।
'ह्रीं श्रीं ऐं' पातु सर्वत्र, 'क्नौं रं लं ह्रीं' सदा मम ।
'क्लीं हसकहलह्रीं' मे, पातु सदा 'सौः क्लीं' मम ।।३।।
'सौः ऐं क्लीं ह्रीं' श्रिया पातु, स-बीजा षोडशाक्षरी ।
आपाद-मस्तकं पातु, महा-त्रिपुर-सुन्दरी ।।४।।
श्रीजयन्ती मस्तके मां, पातु नित्यं विभूतये ।
'ह्रीं' मङ्गला सदा नेत्रे, पातु सर्वार्थ-सिद्धये ।।५।।
'क्लीं' कालिका कर्ण-युग्मं, पातु सर्व-शुभावहा ।
'ऐं' भारती घ्राण-युग्मं, पातु सर्व-जयाप्तये ।।६।।
'सौः' कराली मुखं पातु, सर्व-लोक-वशाप्तये ।
'ऐं' शारदा सदा वाचं, पातु साहित्य-सिद्धये ।।७।।
'ॐ' कपालिनी मे कर्णौ, पातु सद्-गान-सिद्धये ।
'ह्रीं' दुर्गा-सहिता पातु,स्कन्ध-देशौ सदा मम ।।८।।
'श्रीं' क्षम-सहिता पातु, हृदयं मम सर्वदा ।
'ककार'-सहिता धात्री, पार्श्व-युग्मं सदाऽवतु ।।९।।
'एकार'-सहिता स्वाहा, पातु मे जठरं सदा ।
'ईकार'-सहिता नाभिं, स्वधा मां सर्वदाऽवतु ।।१०।।
'लकार'-सहिता ब्राह्मी, पृष्ठ-देशं सदाऽवतु ।
'ह्रीङ्कार'-सह-माहेशी, कटिं पातु सदा मम ।।११।।
'हकार'-सहिता गुह्यं, कौमारी पातु सर्वदा ।
'सकार'-सहिता पातु, वैष्णवी गुद-देशकम् ।।१२।।
'ककार'-युक्ता वाराही, ह्यूरु-युग्मं सदाऽवतु ।
'हकार'-सहिता जानु-युग्मं माहेन्द्री मेऽवतु ।।१३।।

'लकार'-युक्ता चामुण्डा, जङ्घा-युग्मं सदाऽवतु ।
'ह्रीङ्कार'-सहिता गुल्फ-युग्मं लक्ष्मीः सदाऽवतु ।।१४।।
'सकार'-युक्ता मे पाद-युग्मेऽव्यात् शिव-दूतिका ।
'ककार'-सहिता प्राच्यां, चण्डा रक्षतु सर्वदा ।।१५।।
'लकार'-सहिताऽऽग्नेयां, प्रचण्डा सर्वदाऽवतु ।
'ह्रीङ्कार'-सहिता पातु, दक्षिणे चण्ड-नायिका ।।१६।।
'सौः कार'-सहिता चण्ड-वेगिनी नैर्ऋतेऽवतु ।
'ऐङ्कार'-संयुता चण्ड-प्रकाशा पातु पश्चिमे ।।१७।।
'क्लीङ्कार'-सहिता पातु, चण्डिका वायु-गोचरे ।
'ह्रीङ्कार'-सहिता पातु, चामुण्डा चोत्तरे मम ।।१८।।
'श्रीङ्कार'-सहिता रौद्री, पायादैशान्यके मम ।
ऊर्ध्वं ब्रह्माणी मे रक्षेत्, षोडशी-सह सर्वदा ।।१९।।
अधस्ताद् वैष्णवी रक्षेत्, पुनः षोडशी-संयुता ।
सर्वाङ्गं सर्वदा पातु, सहिता भुवनेश्वरी ।।२०।।
जले दावानलेऽरण्ये, महोत्पाते च सागरे ।
दिवा-रात्रौ च मे रक्षेद्, देवी तार-त्रयी मम ।।२१।।

।। फल-श्रुति ।।

इदं तुरीया-सहितं, षोडशाक्षरिकात्मकम् ।
अभेद्यं कवचं त्वेदं, मन्त्र-बीज - समन्वितम् ।।१।।
योगिनी-चक्र-सहितं, तव प्रीत्या प्रकाशितम् ।
धारयस्व मया दत्तं, गोपनीयं सु-पुत्रक ।।२।।
न पुत्राय न शिष्याय, बन्धुभ्यो न प्रकाशयेत् ।
इदं त्रिपुर-सुन्दर्यास्तुरीयं कवचं शुभम् ।।३।।
गोपनीयं प्रयत्नेन, मन्त्र-वर्ण-क्रमोदितम् ।
प्रातरारभ्य सायान्तं, कर्म-वेदान्तमोक्तिकम् ।।४।।
तत्फलं समवाप्नोति, तुरीय-कवच-व्रतम् ।
दशधा मातृका-न्यासं, लघु-षोढ़ा ततः परम् ।।५।।
शक्ति-न्यासं महा-षोढ़ां, कृत्वा बाह्यान्तरं न्यसेत् ।
श्रीविद्यायां महा-न्यासं, क्रमात् सावर्णतां व्रजेत् ।।६।।

पूजान्ते यत्फलं प्राप्तं, तत्फलं कवच-व्रते ।
सवत्सां दुग्ध-सहितां, साधकः कामधेनु-वत् ।।७।।
त्रैलोक्य-विजयायेदं, कवचं परमाद्भुतम् ।
यथा चिन्ता-मणौ पुत्र!, मनसा परि-कल्पिते ।।८।।
तत्सर्वं लभते शीघ्रं, मम वाक्यान्न संशयः ।
सायुरारोग्यमैश्वर्यं, सदा सम्पत्प्रवर्धनम् ।।९।।
कवचस्य प्रभावेण, त्रैलोक्य-विजयी भवेत् ।
अदीक्षिताय न देयं, श्रद्धा-विरहितात्मने ।।१०।।
नाख्येयं यस्य कस्यापि, कृतघ्नायाततायिने ।
शान्ताय गुरु-भक्ताय, देयं शुद्धाय साधने ।।११।।
अज्ञात्वा कवचं चेदं, यो जपेत् पर-देवताम् ।
सिद्धिर्न जायते वत्स!, कल्प-कोटि-शतैरपि ।।१२।।
स एव च गुरु साक्षात्, कवचं यस्तु पुत्रक! ।
त्रि-सन्ध्यं च पठेन्नित्यमिदं कवचमुत्तमम् ।।१३।।
निशार्धे जप-काले वा, प्रत्यहं यन्त्रमग्रतः ।
जगद्वश्यं भवेच्छीघ्रं, नात्र कार्या विचारणा ।।१४।।
सप्त-कोटि-महा-मन्त्राः, सवर्णाः सगुणान्विताः ।
सर्वे प्रसन्नतां यान्ति,सत्यं सत्यं न संशयः ।।१५।।
इति ते कथितं दिव्यं, सगुणे भजन-क्रमम् ।
निर्गुणं परमं वक्ष्ये, तुरीयं कवचं शृणु ।।१६।।
कवचस्यास्य माहात्म्यं, वर्णितुं नैव शक्यते ।
मूलादि-ब्रह्म-रन्ध्रान्तं, श्रीचक्रं समुदीरयेत् ।।१७।।
देह-मध्ये च सर्वस्वं, श्रीचक्रं चिन्तयेत् सुत! ।
पञ्च-विंशति-तत्त्वं च, अतलं वितलं तथा ।।१८।।
सुतलं च तलातलं, महा-तलं च पञ्चमम् ।
रसातलं षष्ठं वक्ष्ये, सप्तमं पाताल-लोकम् ।।१९।।
भूर्भुवः स्वर्लोकमतो, महल्लोक-जनस्तथा ।
तपश्च सत्य-लोकश्च, भुवनानि चतुर्दश ।।२०।।

सर्वं श्रीभुवनं चैव, निराकारं विचिन्तयेत् ।
मानसे पूजयेत् ध्यायेज्ज्योति-रूपं सुचिन्मयम् ।
कवचं प्रजपेद् वत्स!, राज-राजेश्वरो भवेत् ।।२१।।
इति परम-रहस्यं, सर्व-मन्त्रार्थ-सारम् ।
भजति परम-भक्त्या, निश्चलं निर्मलत्वम् ।।२२।।
विलसित भुवि मध्ये, पुत्र-पौत्राभि-वृद्धिम् ।
धन-सकल-समृद्धिं, भोग-मोक्ष-प्रदं च ।।२३।।
।। श्रीचूड़ामणौ श्रीशिव-स्कन्द-संवादे त्रैलोक्य-विजयं नाम श्रीतुरीया-षोडशी श्रीराज-राजेश्वरी महा-त्रिपुर-सुन्दरी-कवचम् ।।

★★★

## भगवती षोडशी की आराधना

**तव युग-चरणों की पूजा करने से त्रिगुण-जनित अविलम्ब-**
**तीनों देवों की पूजा भी, हो जाती है पूरी अम्ब!**
**क्योंकि निकट मणि-पीठ मंजु जो धारण करता चरण त्वदीय।**
**सदा खड़े रहते ये जोड़े, निज मुकुटों पर कर कमनीय।।**

हे शिवे! तुम्हारे चरण-युगल की पूजा ही सत्त्व, रज और तमो-गुणों से सृष्ट तीनों देवों की पूजा है क्योंकि ये उच्च मुकुटवाले (देव) हाथ जोड़े तुम्हारे पाँव रखने की मणियों की बनी चौकी के समीप खड़े हैं।

॥ श्रीमहा-त्रिपुर-सुन्दरी को नमस्कार॥

# श्रीतुरीया-षोडशी-त्रैलोक्य-विजय-कवच-साधना(हिन्दी-रूपान्तर)

## ।। पूर्व-पीठिका ।।

**सुरम्य कैलास पर्वत** पर **देवाधि-देव जगद्-गुरु शङ्कर** से **मयूर-वाहन कुमार** ( **कार्त्तिकेय** या **स्कन्द** ) ने पूछा ।।१।।

**श्रीस्कन्द** ने कहा–**हे पिताजी, श्रीगुरुदेव!** आप पुत्र-प्रेम बढ़ानेवाले हैं। **हे परमेश्वर! षोडशाक्षरी** ( विद्या का ) कवच कहिए ।।२।।

**श्रीशिव जी** ने कहा–हे पुत्र! **मन्त्र-विग्रहात्मक** यह **कवच** गुप्त-से-गुप्त है ।।३।। तुम्हारे प्रति स्नेह से कहता हूँ। जिस-तिस से नहीं कहा गया है। **ब्रह्मा, ईश, विष्णु** और **इन्द्र** से भी नहीं कहा गया है ।।४।। न तो **दैत्यों,** न **देवताओं** और न ही **शौनकादि** से कहा है, किन्तु तुम्हारी भक्ति-वश इस **कवच** को गुप्त रखने में समर्थ नहीं हूँ ।।५।।

**सवर्णा** और सद्-गुणों से युक्त **एकादश महा-विद्याओं** में प्रधान यह **कवच** मेरे द्वारा कहा गयां है ।।६।। **गणेश, सूर्य, विष्णु, शिव - शक्ति, भैरव** और **सभी पाँचों तत्त्व-कवच** के आवर्तन ( सतत-पाठ ) से सन्तुष्ट होते हैं ।।७।।

**त्रैलोक्य-विजय-दायक** यह **तुरीय कवच** ( यहाँ **'तुरीय'** शब्द संख्या-वाचक न होकर विशेषण के रूप में है ) **ऊर्ध्वाम्नाय** के **महा-मन्त्रों** से मेरे द्वारा निर्मित है ।।८।।

**श्रीस्कन्द** ने कहा–**धर्म, अर्थ, काम** और **मोक्ष** देनेवाली देवी का **श्रेष्ठ कवच** जो आपने पहले सूचित किया है, मैं सुनना चाहता हूँ ।।९।। जिसके बिना **आराधना, जप** और **ध्यानादि कर्म** नहीं होते, वह **कवच, हे प्रभो!** जैसे भी हो, मुझसे कहिए ।।१०।।

**श्रीईश्वर** ने कहा–**हे महा-प्रज्ञावान् पुत्र!** यह **दिव्य तुरीय कवच** अत्यन्त शुभ और सभी मन्त्रों से युक्त, रहस्य का भी रहस्य ( अत्यन्त रहस्य-मय ) है ।।११।।

पूजन के अन्त में जप के पूर्व **कवच** पढ़ना चाहिए। इस **कवच** के ऋषि **आनन्द-भैरव** हैं ।।१२।। **गायत्री** छन्द है और **श्रीश्रीविद्या** इसकी देवता हैं। **'रमा'** ( **श्रीं** ) इसका बीज है, **'परा'** (**ह्रीं**) बीज इसकी शक्ति और **'वाग्भव'** ( **ऐं** ) बीज कीलक है ।।१३।।

**सर्वार्थ-सिद्धि** के लिए इसका विनियोग है। अंगुष्ठ में **'वाग्भव'** ( **ऐं** ) तथा तर्जनी में **'हृल्लेखा'** ( **ह्रीं**) का न्यास करे ।।१४।। **'लक्ष्मी-बीज'** (**श्रीं**) का मध्यमा में, **अङ्गिरा** (**ऐं**) बीज का अनामिका में, **'परा-बीज'** ( **ह्रीं**) का कनिष्ठा में और **'लक्ष्मी'** ( **श्रीं** ) का करतल में न्यास करे ।।१५।।

हृदय में **'वाग्भव'** ( **ऐं** ), शिर में **'परा'** ( **ह्रीं** ), शिखा में **'लक्ष्मी'** ( **श्रीं** ), **कवच** में **'वाग्भव'** ( **ऐं** ), नेत्रों में **'हल्लेखा'** ( **ह्रीं** ) और अस्त्र में **'कमला'** ( **श्रीं** ) का न्यास करे। **'भूर्भुवः स्वः'** से **दिग्-बन्धन** करे। **न्यास, ध्यान** आदि करके ही **कवच** का पाठ करना चाहिए। **धर्म, अर्थ, काम** और **मोक्ष-दायक ध्यान** कहता हूँ ।।१६-१८।।

**क्षीर-सागर** के मध्य में **मनोहर रत्न-द्वीप** में स्थित **रत्न-सिंहासन** पर **देवी का चिन्तन** ( **ध्यान** ) करे ।।१९।। वे **करोड़ों सूर्यों** के समान प्रकाशमान हैं। **करोड़ों चन्द्रमाओं** के समान उनका मुख-मण्डल है, वे **दाडिम** ( **अनार** ) **पुष्प** और **कुंकुम** के समान रङ्ग की आभा से युक्त हैं ।।२०।।

**जपा-कुसुम** (**जासौन**) के समान उनके तीन नेत्र हैं। **पाश, अंकुश, इक्षु-चाप** ( गन्ने से बना धनुष ) और **बाणों** से युक्त **चार भुजाएँ** हैं ।।२१।। **कपूर** आदि से सुवासित **ताम्बूल** से उनका मुख भरा है। सब प्रकार के शृङ्गार से युक्त उनके सभी अवयव ( अङ्ग ) अत्यन्त सुन्दर हैं ।।२२।। वे सभी आयुधों से युक्त हैं, पूरे परिवार और आवरण-देवताओं से युक्त हैं। प्रसन्नता उनके शरीर और आँखों से झलकती है ।।२३।।

**हे वीर**! इस प्रकार ध्यान करके **समस्त कामनाओं के दाता** और **सब प्रकार से रक्षा** करनेवाले **शुभ कवच** से अपनी देह को ढाँके ( रक्षा करे ) ।।२४।।

**।। कवच-स्तोत्र-पाठ ।।**

मेरी शिखा की रक्षा **'ह्सौः'** और ब्रह्म-रन्ध्र की रक्षा **'स्हौ'** करें। मेरे बाँएँ और दाहिने भाग की रक्षा सदा **'ह्लौं'** करें ।।१।। **'ऐं ह्रीं श्रीं' षोडशी सुन्दरी परा** सदा रक्षा करें। **'श्रीं ह्रीं क्लीं'** सर्वदा रक्षा करें, **'ऐं सौः ॐ'** सदा मेरी रक्षा करें ।।२।। **'ह्रीं श्रीं ऐं'** सब जगह और **'क्नौं रं लं ह्रीं'** सदा मेरी रक्षा करें। **'क्लीं ह-स-क-ह-ल-ह्रीं'** और **'सौः क्लीं'** सदा मेरी रक्षा करें ।।३।।

**'सौः ऐं क्लीं ह्रीं'** बीज-युक्त **षोडशाक्षरी लक्ष्मी** मेरी रक्षा करें। आपाद-मस्तक ( सिर से पैरों तक ) **महा-त्रिपुर-सुन्दरी** रक्षा करें ।।४।। सदा विभूति के लिए **श्रीजयन्ती** मेरे मस्तक की रक्षा करें। सर्वार्थ-सिद्धि के लिए **'ह्रीं' मङ्गला** सदा मेरे नेत्रों की रक्षा करें ।।५।। सर्व-शुभावहा **'क्लीं' कालिका** दोनों कानों की रक्षा करें। सर्व-विध जय-प्राप्ति के लिए **'ऐं' भारती** घ्राण-युग्म (नासा-पुट-द्वय) की रक्षा करें ।।६।।

सर्व-लोक-वशीकरण के लिए **'सौः' कराली** मुख की रक्षा करें। साहित्य-सिद्धि के लिए **'ऐं' शारदा** सदा वाचा ( वाणी ) की रक्षा करें ।।७।। सद्-गायन की सिद्धि के लिए **'ॐ' कपालिनी** मेरे कानों की रक्षा करें। **दुर्गा** के साथ **'ह्रीं'** मेरे स्कन्ध 'कन्धे' की सदा रक्षा

करें ।।८।। **क्षमा**-सहित **'श्रीं'** सर्वदा मेरे हृदय की रक्षा करें। **ककार-सहित धात्री** मेरे दोनों पार्श्वों की रक्षा करें ।।९।।

**एकार-सहित 'स्वाहा'** मेरे जठर ( पेट ) की रक्षा करें। **ईकार-सहित 'स्वधा'** सर्वदा मेरी नाभि की रक्षा करें ।।१०।। **लकार-सहित ब्राह्मी** सदा पृष्ठ-देश की रक्षा करें। **'ह्रीं'कार-सहित माहेशी** सदा मेरी कमर की रक्षा करें ।।११।। **हकार-सहित कौमारी** सर्वदा गुह्य-स्थान की रक्षा करें। **सकार-सहित वैष्णवी** गुद-देश की रक्षा करें ।।१२।।

**ककार-सहित वाराही** सदा उरु-द्वय की रक्षा करें। **हकार-सहित माहेन्द्री** जानु-द्वय की रक्षा करें।।१३।। **लकार-सहित चामुण्डा** दोनों जंघाओ की सदा रक्षा करें। **ह्रींकार-सहित लक्ष्मी** ( महा-लक्ष्मी ) गुल्फ-द्वय की रक्षा करें।।१४।। **सकार-सहित शिव-दूती** दोनों पैरों की रक्षा करें। **ककार-सहित चण्डा** सदा पूर्व दिशा में रक्षा करें ।।१५।।

**लकार-सहित प्रचण्डा** सर्वदा आग्नेय दिशा में रक्षा करें। **ह्रींकार-सहित चण्ड-नायिका** दक्षिण - दिशा में रक्षा करें।।१६।। **सौः-कार-सहित चण्ड-वेगिनी** नैऋत्य दिशा में रक्षा करें। **ऐंकार-सहित चण्ड-प्रकाशा** पश्चिम दिशा में रक्षा करें।।१७।। **क्लींकार-सहित चण्डिका** वायव्य दिशा में रक्षा करें। **ह्रींकार-सहित चामुण्डा** उत्तर-दिशा में रक्षा करें ।।१८।।

**श्रींकार-सहित रौद्री** ईशान-दिशा में मेरी रक्षा करें। **षोडशी के साथ ब्रह्माणी** ऊर्ध्व-दिशा में रक्षा करें।।१९।। **षोडशी के साथ वैष्णवी** अधो-दिशा में रक्षा करें। सर्वाङ्ग की सर्वदा रक्षा **षोडशी-सहित भुवनेश्वरी** करें।।२०।। जल में, दावानल में, जङ्गल में, महोत्पात में, समुद्र में दिन-रात **तार-त्रयी** ( **'ऐं ह्रीं श्रीं'** -स्वरूपा ) **देवी** मेरी रक्षा करें ।।२१।।

## ।। फल-श्रुति ।।

यह **तुरीया-कवच षोडशाक्षर-मन्त्र** के बीजों से निर्मित और अभेद्य है ।।१।। **योगिनी-चक्र -सहित** इसे तुम्हारी प्रीति-वश प्रकाशित किया है। **हे सुपुत्र**! मेरे द्वारा दिए गए इस गोपनीय कवच को धारण करो ।।२।। **श्रीत्रिपुर-सुन्दरी** का यह **तुरीय-कवच** पुत्र, शिष्य और बन्धु आदि को भी नहीं बताना चाहिए ।।३।। **मन्त्र-वर्णों** के क्रम में कहा गया यह **कवच** प्रयत्न-पूर्वक गुप्त रखे। **प्रातः -काल** से **सन्ध्या-काल** तक के कर्म वैदिक कहे गए हैं ।।४।।

इनके समान फल **तुरीय-कवच** के व्रत से मिलता है। दस प्रकार के **मातृका-न्यास, लघु-षोढा-न्यास** ।।५।। **शक्ति-न्यास** तथा **महा-षोढा-न्यास** बाह्य और अन्तर में करे।

**श्रीश्रीविद्या** के **महा-न्यास** से क्रमानुसार सावर्णता मिलती है।।६।। इन **न्यासों-सहित पूजन** से जो फल मिलता है, वह **कवच-व्रत ( पाठ )** से ही मिल जाता है। साधक बछड़े और दुग्ध-दायी काम-धेनु के समान हो जाता है ।।७।।

यह **त्रैलोक्य-विजय कवच** परम अद्‌भुत है। जिस प्रकार **हे पुत्र**! मन-चाही वस्तु सोचते ही **चिन्ता-मणि** उसे प्रदान करती है ।।८।। उसी प्रकार इससे भी शीघ्र ही कामना-पूर्ति होती है, यह मेरा कथन संशय-हीन है। **आयु, ऐश्वर्य** और **सदा सम्पत्ति की वृद्धि** के साथ, **कवच** के प्रभाव से साधक **त्रैलोक्य-विजयी** होता है। अदीक्षित और श्रद्धा से हीन मनवाले व्यक्ति को यह **कवच** नहीं देना चाहिए ।।९-१०।। न ही कृतघ्न और आत-तायी ( अत्याचारी) आदि जिस-तिस से इसे कहना चाहिए। **शान्त, गुरु-भक्त, शुद्ध** और **साधु** को ही देना चाहिए ।।११।।

इस **कवच** को बिना जाने जो **पर-देवता का मन्त्र** जपता है, उसे **हे वत्स**! सैकड़ों करोड़ कल्पों में भी सिद्धि नहीं मिलती ।।१२।। **हे पुत्र**! जो **तीनों सन्ध्याओं** में इस **उत्तम कवच** का **नित्य पाठ** करता है, वह **साक्षात् गुरु** है ।।१३।।**अर्ध-रात्रि** में, **जप-काल** में, प्रति-दिन **यन्त्र-राज** के आगे जो इसका **पाठ** करता है, वह सारे संसार को शीघ्र ही वश में कर लेता है, इसमें संशय नहीं ।।१४।। उत्तम वर्ण और गुणों से युक्त **सात करोड़ महा-मन्त्र** ( इसके **पाठ** से ) प्रसन्न हो जाते हैं। यह सत्य है, इसमें संशय नहीं ।।१५।। **कवच** का यह **सगुण भजन-क्रम** है। अब इसका **निर्गुण-क्रम** सुनो-।।१६।।

इस **कवच** का माहात्म्य वर्णित करने में मैं समर्थ नहीं हूँ। **मूलाधार** से **ब्रह्म-रन्ध्र** तक **श्रीचक्र** कहा गया है अर्थात् **मूलाधार** से **ब्रह्म-रन्ध्र** पर्यन्त करे ।।१७।। **शरीर के मध्य में समस्त श्रीचक्र का चिन्तन** करे। **पच्चीस तत्त्वों** तथा **अतल, वितल, सुतल, तलातल, महा-तल, रसातल** और सातवाँ **पाताल-लोक** ।।१८-१९।। **भूः, भुवः, स्वः, महः, जनः तपः** और **सत्य-लोक**-ये **चौदह भुवन** ।।२०।। इन सभी के साथ **श्रीभुवन** को भी **निराकार ध्यान** करके **चिन्मय-ज्योति-स्वरूपिणी देवता** का **मानसिक पूजन** करके **कवच का पाठ-कर्त्ता** हे वत्स! **राज-राजेश्वर** होता है।।२१।।

यह सभी मन्त्रों का सार **परम रहस्य-मय** है। जो **परम भक्ति** से निश्चल ( दृढ़ ) और निर्मल मन से इस (**कवच**) का **भजन** करता है, वह इस लोक में पुत्र-पौत्रादि की वृद्धि, सभी प्रकार की धन-सम्पत्ति-युक्त पाकर **क्रीड़ा** ( **जीवन-यापन** ) करता है और **भोग-मोक्ष** को पाता है ।।२३।।

★★★

।। श्रीमहा-त्रिपुर-सुन्दर्यै नमः।।

# श्रीषोडशी-कवच-साधना

।। पूर्व-पीठिका—श्रीदेव्युवाच ।।

भगवन् देव-देवेश!, लोकानुग्रह-कारक ।
त्वत्-प्रसादान् महा-देव!, श्रुता मन्त्रास्त्वनेकधा ।।१।।
साधनं विविधं देव!, कीलकोद्धरणं तथा ।
शापादि-दूषणोद्धारः, श्रुतस्त्वत्तो मया प्रभो! ।।२।।
राज-राजेश्वरी-देव्याः, कवचं सञ्चितं मया ।
श्रोतुमिच्छामि त्वत्तस्तत्कथयस्व दया-निधे! ।।३।।

।। श्रीईश्वर उवाच ।।

लक्ष-वार-सहस्राणि, वारिताऽसि पुनः पुनः ।
स्त्री-स्वभावात् पुनर्देवि!, पृच्छसि त्वं मम प्रिये! ।।४।।
अत्यन्त-गुह्यं कवचं, सर्व-काम-फल-प्रदम्।
प्रीतये तव देवेशि!, कथयामि शृणुष्व तत् ।।५।।

।। कवच-स्तोत्रम् ।।

विनियोग—ॐ अस्य श्रीषोडशी-कवचस्य श्रीमहादेव ऋषिः। प्रस्तार-पंक्तिश्छन्दः। श्री राज-राजेश्वरी महा-त्रिपुर-सुन्दरी देवता। धर्मार्थ-काम-मोक्ष-साधने पाठे विनियोगः।

ऋष्यादि-न्यास—श्रीमहादेव-ऋषये नमः शिरसि। प्रस्तार-पंक्तिश्छन्दसे नमः मुखे। श्रीराज-राजेश्वरी-महा-त्रिपुर-सुन्दरी-देवतायै नमः हृदि। धर्मार्थ-काम-मोक्ष-साधने पाठे विनियोगाय नमः सर्वाङ्गे।

पूर्वे मां भैरवी पातु, बाला मां पातु दक्षिणे ।
मालिनी पश्चिमे पातु, त्रासिनी तूत्तरेऽवतु ।।१।।
ऊर्ध्वं पातु महा-देवी, महा-त्रिपुर-सुन्दरी ।
अधस्तात् पातु देवेशी, पातालातल-वासिनी ।।२।।
आधारे वाग्भवः पातु, काम-राजस्तथा हृदि ।
डामरः पातु मां नित्यं, मस्तके सर्व-कामदः ।।३।।
ब्रह्म-रन्ध्रे सर्व-गात्रे, छिद्र-स्थाने च सर्वदा ।
महा-विद्या भगवती, पातु मां परमेश्वरी ।।४।।

ऐंह्रीं ललाटे मां पातु, क्लीं क्लुं सश्च नेत्रयोः ।
नासायां मे कर्णयोश्च, द्रीं द्रैं द्रां द्रीं चिबुके तथा ।।५।।
सौः पातु गले हृदये, सह्रीं नाभि-देशके ।
कलह्रीं क्लीं स्त्रीं गुह्य-देशे सह्रीं पादयोस्तथा ।।६।।
सह्रीं मां सर्वतः पातु, सकली पातु सन्धिषु ।
जले स्थले तथाकाशे, दिक्षु राज-गृहे तथा ।।७।।
हूं क्षेमा त्वरिता पातु, सह्रीं सक्लीं मनोभवा ।
हंसः पायान् महा-देवि!, परं निष्कल-देवता ।।८।।
विजया मङ्गला दूती, कल्याणी भग-मालिनी ।
ज्वाला च मालिनी नित्या, सर्वदा पातु मां शिवा ।।९।।

।। फल-श्रुति ।।

इत्येवं कवचं देवि!, देवानामपि दुर्लभम् ।
तव प्रीत्या मयाख्यातं, गोपनीयं प्रयत्नतः ।।१।।
इदं रहस्यं परमं, गुह्याद् गुह्यतरं प्रिये! ।
धन्यं यशस्यमायुष्यं, भोग-मोक्ष-प्रदं शिवे! ।।२।।
दुःस्वप्न-नाशनं पुण्यं, नर-नारी-वशङ्करम् ।
आकर्षण-करं देवि!, स्तम्भोच्चाटकं शिवे! ।।३।।
इदं कवचमज्ञात्वा, राज-राजेश्वरीं पराम् ।
योऽर्चयेद् योगिनी-वृन्दैः, स भक्ष्यो नात्र संशयः ।।४।।
न तस्य मन्त्र-सिद्धिः स्यात्, कदाचिदपि शाङ्करि! ।
इह-लोके च दारिद्र्यं, रोग-दुःखाशुभानि च ।।५।।
परत्र नरकं गत्वा, पशु-योनिमवाप्नुयात् ।
तस्मादेतत् सदाभ्यासादधिकारी भवेत् किल ।।६।।
मद्-वक्त्र-निर्गतमिदं,देव्याः कवचं सु-पुण्यम् ।
पूजा-विधेश्च पुरतो विधिना पठेद्यः ।।७।।
सौभाग्य-भाग-ललितानि शुभानि भुक्त्वा ।
देव्याः पदं भजति तत् पुनरन्त-काले ।।८।।

।। कुलानन्द-संहितायां श्रीषोडशी-कवचम्।।

★★★

॥ श्रीललिता-त्रिपुर-सुन्दरी को नमस्कार॥

# श्रीषोडशी-कवच-साधना (हिन्दी-रूपान्तर)

## ।। पूर्व-पीठिका ।।

**श्रीदेवी** ने कहा–**हे देव-देवेश्वर भगवन्!** आप लोकों पर दया करनेवाले हैं। आपकी कृपा से मैंने अनेक प्रकार के मन्त्र सुने हैं। अनेक प्रकार के साधन, कीलक, उद्धार, शापादि-दोषों के दूर करने के उपाय आपसे मैंने सुने हैं। **राज-राजेश्वरी देवी** का कवच मैं सुनना चाहती हूँ। हे दया-निधे! उसे कहिए।।१-३।।

**श्री ईश्वर** ने कहा–लाखों बार मना करने पर भी **हे देवि!** स्त्री-स्वभाव से तुम पुनः उस अति गोपनीय कवच को पूछ रही हो, जो सभी कामनाओं का फल देनेवाला है। **हे देवेशि!** तुम्हारी प्रसन्नता के लिए उसे कहता हूँ , सुनो।।४-५।।

## ।। विनियोग ।।

इस **श्रीषोडशी - कवच** के ऋषि **श्रीमहा - देव**, छन्द **प्रस्तार - पंक्ति**, देवता **श्रीराज-राजेश्वरी महा-त्रिपुर-सुन्दरी** हैं और इसके पाठ का विनियोग **धर्मार्थ-काम-मोक्ष** की सिद्धि के लिए किया जाता है।

## ।। ऋष्यादि-न्यास ।।

शिर में **श्री महा-देव** ऋषि को, मुख में **प्रस्तार-पंक्ति** छन्द को, हृदय में **श्रीराज-राजेश्वरी महा-त्रिपुर-सुन्दरी** देवता को नमस्कार है और सारे शरीर में **धर्म-अर्थ-काम-मोक्ष** की सिद्धि हेतु इसके पाठ के विनियोग को नमस्कार है।

## ।। श्रीषोडशी-कवच-स्तोत्र ।।

पूर्व में **भैरवी** मेरी रक्षा करें, **बाला** दक्षिण में मेरी रक्षा करें। **मालिनी** पश्चिम में, उत्तर में **त्रासिनी** रक्षा करें ।।१।।

ऊपर **महा-देवी महा-त्रिपुर-सुन्दरी** रक्षा करें, नीचे पातालातल-वासिनी **देवेशी** रक्षा करें।।२।।

मूलाधार में **वाग्भव 'ऐं'** रक्षा करें और हृदय में **काम-राज 'क्लीं'**। सभी कामनाओं को पूरा करनेवाला **डामर 'सौः'** सदा मेरे मस्तक की रक्षा करें ।।३।।

ब्रह्म-रन्ध्र में और शरीर के सभी छिद्र-स्थानों में **महा-विद्या भगवती परमेश्वरी** सदा मेरी रक्षा करें ।।४।।

ललाट में **'ऐं ह्रीं'** मेरी रक्षा करें और नेत्रों में **'क्लीं क्लुं सः'**। नाकों और कानों में तथा चिबुक ( ठोड़ी-ठुड्डी ) में **'द्रीं द्रैं द्रां द्रीं'** ।।५।।

गले और हृदय में **'सौः'** रक्षा करें, नाभि में **'सहहीं'**। गुह्य में **'कलहीं क्लीं स्त्रीं'** और पैरों में **'सहीं'** ।।६।।

सभी ओर **'सहीं'** मेरी रक्षा करें। सन्धियों में, जल-स्थल-आकाश और दिशाओं में तथा राज-महल में **'सकली'** रक्षा करें ।।७।।

**'हूं क्षेमा त्वरिता', 'सहीं सक्लीं मनोभवा'** रक्षा करें। **हे महा-देवि!** परम निष्कल देवता **'हंसः'** रक्षा करें ।।८।।

**'विजया, मङ्गला, दूती, कल्याणी, भग-मालिनी, ज्वाला-मालिनी, नित्या, शिवा'** सदैव मेरी रक्षा करें ।।९।।

## ।। फल-श्रुति ।।

**हे देवि!** यह **कवच** देवों के लिए भी दुर्लभ है। तुम्हारे प्रेम-वश कहा है, इसे यत्न-पूर्वक गुप्त रखना चाहिए।।१।।

हे प्रिये! यह गुप्त से भी गुप्त **अति गुप्त** है। यह **धन-धान्य, आयु, भोग** और **मोक्ष** देनेवाला है।।२।।

बुरे स्वप्नों के प्रभाव को यह नष्ट करनेवाला और स्त्री-पुरुष सभी को वशीभूत करनेवाला है। **हे शिवे!** इससे आकर्षण, स्तम्भन और उच्चाटन होते हैं ।।३।।

इस **कवच** को जाने बिना जो **परा देवी राज-राजेश्वरी** की पूजा करता है, उसे **योगिनियाँ** खा जाती हैं, इसमें सन्देह नहीं ।।४।।

**हे शाङ्करि!** उसे कभी **मन्त्र की सिद्धि** नहीं मिलती। इस संसार में **दरिद्रता, रोग, दुःख** और **अकल्याण**-ग्रस्त होकर अन्त में नरक में जाकर वह पशु-योनि में जन्म लेता है। इसलिए विधि-वत् अभ्यास कर इस **कवच का अधिकारी** बनना चाहिए।।५-६।

मेरे मुख से निकला हुआ यह **कवच** बहुत ही पुण्य-दायक है। **कवच की पूजा-विधि** को **गुरु** से जानकर जो विधि-पूर्वक इसका पाठ करता है, वह **सुन्दर सौभाग्य** को भोग कर अन्त में **देवी के परम पद** को प्राप्त करता है।।७-८।।

★★★

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीपरा-महा-योनि-कवच-साधना

।। पूर्व-पीठिका ।।

ॐ नमः शिवाय गुरवे, नाद-विन्दु-कलात्मने।
श्रीगणेशाय नमः। श्रीमन्महा-त्रिपुर-सुन्दर्यै नमः ।

।। श्रीभैरव उवाच ।।

क्रम-दीक्षा-विधानानि, मयोक्तानि महेश्वरि!।
त्वयात्मनः कुलागारे, कवचं यत् सु-गोपितम् ।।१।।
अधुना कृपया त्वं च, तत्-सर्वं वक्तुमर्हसि।

।। श्रीभैरव्युवाच ।।

शृणु! नाथ प्रवक्ष्यामि, तन्त्र-सारमिदं महत् ।।२।।
एतच्छ्री-कवचस्यास्य, पर-ब्रह्म ऋषिः शिवः।
महती जगतीच्छन्दश्चिच्छक्तिर्देवतोच्यते।।३।।
ऐं वीजं ह्रीं तथा शक्तिः, सकलह्रीं कीलकं तथा।
पर-ब्रह्म-प्राप्ति-हेतौ, विनियोगः प्रकीर्तितः।।४।।

।। विनियोग ।।

ॐ अस्य श्री परा-महा-योनि-कवचस्य श्री पर-ब्रह्म-शिवः ऋषिः। महती जगतीः छन्दः। श्री चिच्छक्तिः देवता। ऐं वीजं। ह्रीं शक्तिः। सकलह्रीं कीलकं। पर-ब्रह्म-प्राप्ति-हेतौ पाठे विनियोगः।

।। ऋष्यादि-न्यास ।।

श्री पर - ब्रह्म - शिवः - ऋषये नमः शिरसि। महती जगतीः - छन्दसे नमः मुखे। श्री चिच्छक्तिः-देवतायै नमः हृदये। ऐं-वीजाय नमः गुह्ये। ह्रीं-शक्त्ये नमः नाभौ। सकलह्रीं-कीलकाय नमः पादयोः । पर-ब्रह्म-प्राप्ति-हेतौ पाठे विनियोगाय नमः सर्वांगे।

। ध्यान ।।

ॐ आधारे तरुणार्क-बिम्ब-रुचिरं हेम-प्रभं वाग्भवम्।
बीजं मन्मथमिन्द्र-गोप-सदृशं हृत्-पङ्कजे संस्थितम् ।।
विष्णु-ब्रह्म-पदस्थ-शक्ति-कलितं सोम-प्रभा-भासुरम्।
ये ध्यायन्ति पद-त्रयं तव शिवे! ते यांति सौख्यं पदम् ।।

।। कवच-पाठ ।।

ॐ ह्रीं स्त्रीं हूं फट् उग्र-तारा, मूलाधारं ममावतु ।
ह्रीं भुवनेश्वरी पातु, स्वाधिष्ठानं च मे सदा।।१।।
क्रीं हूं ह्रीं दक्षिणा पातु, मणिपुरं तथा मम।
नमो भगवत्यै हस्रूक्रें, कुब्जिकायै स्हां स्हीं स्हूं -
ङञणनमे-अघोरा-मुखि छां छी किणि-किणि विच्चे ।।२।।
अनाहतं सदा पातु, कुब्जिका परमेश्वरी।
फ्रें ख्रें गुह्य-काली सा, विशुद्धं मे च रक्षतु ।।३।।
क-ए-ई-ल-ह्रीं ह-स-क-ह-ल-ह्रीं स-क-ल-ह्रीं श्रीं ।
आज्ञा-चक्रं महा-देवी, षोडशी पातु मे सदा ।।४।।
हस्क्ष्म्लवरयूँ स्हक्ष्म्लवरयीं ।
नाद-चक्रं च मे पातु, श्रीमदानन्द-भैरवः ।।५।।
ह्सौः स्हौः अर्ध-नारीश्वरी बिन्दुश्च मेऽवतु।
हंसः सोऽहं सदा पातु, सहस्रारं सदा मम ।।६।।
कएईलह्रीं हसकहलह्रीं सकलह्रीं श्रीं।
शिरो मे पातु सा देवी, महा-त्रिपुर-सुन्दरी ।।७।।
'कएईलह्रीं' कामेशी, भ्रू-मध्यं मे सदाऽवतु।
'हसकहलह्रीं' वज्रेशी, दक्ष-नेत्रं सदाऽवतु ।।८।।
'सकलह्रीं' वाम-नेत्रं, रक्षतु भग-मालिनी ।
'हस्रें हस्कलह्रीं ह्सौः', त्रि-नेत्रं पातु भैरवी ।।९।।
'ह्रीं श्रीं सौः' त्रिपुरा-सिद्धा, कर्णौ मे परि-रक्षतु ।
'ह्रीं क्लीं क्षुं' मां सदा पातु, मुखं त्रिपुर-मालिनी।।१०।।
'हसैं हस्क्लीं हसौं' कण्ठं, पातु श्रीत्रिपुरा-श्रीर्मे।
'हैं हक्लीं हसौं' पातु, वक्षस्त्रिपुर-वासिनी ।।११।।
दौवारिजौ सदा पातु, ह्याणिमाद्यष्ट-सिद्धयः ।
'ह्रीं क्लीं सौः' पातु मे नाभिं, परा त्रिपुर-सुन्दरी ।।१२।।
दश-मुद्रा-युता देवी, ममोरू पातु सर्वदा ।
'ऐं क्लीं सौः' पातु मे जानू, श्रीमहा-त्रिपुरेश्वरी ।।१३।।
षड्-दर्शनं सदा पातु, जङ्घा-युग्मं च सर्वदा ।
'अं आं सौः' त्रिपुरा पातु, पादौ च सतत नमः ।।१४।।

'ॐ ह्रीं श्रीं' पातु मां पूर्वे, श्रीमहा-भुवनेश्वरी।
'कएईलह्रीं' दक्षिणे मां, पराऽऽद्या परि-रक्षतु ।।१५।।
'सौः ऐं क्लीं ह्रीं श्रीं' श्रीकुजा, पश्चिमे मां सदाऽवतु।
'श्रीं ह्रीं क्लीं ऐं सौः' चोत्तरे मां, पातु योगेश्वरी परा।।१६।।
'हसकहलह्रीं' पातु, मामधो वज्र-योगिनी ।
'सकलह्रीं' सा ललिता, ह्यूर्ध्वे मां परि-रक्षतु ।।१७।।
श्रीं-५ ॐ-३ क-५ ह-६ स-४ सौः-५ सदाऽवतु।
सर्वाङ्गं मे च चिद्रूपा, महा-त्रिपुर-सुन्दरी ।।१८।।

(श्रीं-५ = श्रीं ह्रीं क्लीं ऐं सौः, ॐ-३ = ॐ ह्रीं श्रीं, क-५ = क ए ई ल ह्रीं, ह-६ = ह स क ह ल ह्रीं, स-४ = स क ल ह्रीं, सौः-५ = सौः ऐं क्लीं ह्रीं श्रीं)

।। फल-श्रुति।।

इति ते कथितं देव!, ब्रह्मानन्द-मयं परम् ।
श्रीमहा - योनिराख्यातं, कवचं देव-दुर्लभम् ।।१।।
मम तेजसा रचितं, श्रीविद्या-क्रम-संयुतम् ।
तव स्नेहान्महा-देव!, तवाग्रे तु मयोदितम् ।।२।।
राज्यं देयं शिरो देयं, न देयं कवचं परम् ।
देयं पूर्णाभिषिक्ताय, स्व-शिष्याय महेश्वर! ।।३।।
अन्यथा नारकी भूयात्, कल्प-कोटि-शतैरपि ।
दिक्-सहस्त्रेण पाठेन, ह्यसाध्यं साध्यते क्षणात् ।।४।।
लक्षं जप्त्वा महा-देव!, तद्दशांशं हुनेद् यदि ।
ब्रह्म - ज्ञानमवाप्नोति, पर-ब्रह्मणि लीयते ।।५।।
भूर्जे विलिख्य गुटिकां, स्वर्णस्थां धारयेद् यदि ।
कण्ठे वा दक्षिणे बाहौ, साक्षात् कामेश्वरो भवेत् ।
नारी वाम - भुजे धृत्वा, भवेत् त्रिपुर-सुन्दरी ।।६।।

ॐ तत्सत् श्रीमहा-निर्वाण-तन्त्रे श्रीमहा-योनि-नाम
श्रीमन्महा-त्रिपुर-सुन्दरी-कवचम्।।

★★★

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीषोडशी-हृदय-स्तोत्र-साधना

कैलासे करुणाक्रान्ता, परोपकृति-मानसा।
पप्रच्छ करुणा-सिन्धुं, सु-प्रसन्नं महेश्वरम् ।।१।।

।। श्रीपार्वत्युवाच ।।

आगामिनि कलौ ब्रह्मन्!, धर्म-कर्म-विवर्जिताः।
भविष्यन्ति जनास्तेषां, कथं श्रेयो भविष्यति? ।।२।।

।। श्रीशिव उवाच ।।

शृणु देवि! प्रवक्ष्यामि, तव स्नेहान्महेश्वरि!।
दुर्लभं यत् त्रिलोकेषु, सुन्दरी-हृदय-स्तवम् ।।३।।

ये नरा दुःख-सन्तप्ता, दारिद्र्य-हत-मानसाः।
अस्यैव पाठ-मात्रेण, तेषां श्रेयो भविष्यति ।।४।।

विनियोग—ॐ अस्य श्रीमहा-त्रिपुर-सुन्दरी-हृदय-स्तोत्र-मन्त्रस्य श्री आनन्द-भैरव ऋषिः। दैवी गायत्री छन्दः। श्रीमहा-त्रिपुर-सुन्दरी देवता। ऐं बीजं। सौः शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे विनियोगः।

ऋष्यादि-न्यास—श्री आनन्द-भैरवाय-ऋषये नमः शिरसि। दैवी-गायत्री-छन्दसे नमः मुखे। श्रीमहा-त्रिपुर-सुन्दरी-देवतायै नमः हृदये। ऐं बीजाय नमः लिङ्गे। सौः शक्तये नमः नाभौ। क्लीं कीलकाय नमः मूलाधारे। धर्मार्थ-काम-मोक्षार्थे विनियोगाय नमः पादयोः।

| षडङ्ग-न्यासः | कर | अङ्ग |
|---|---|---|
| ऐं ह्रीं क्लीं | अंगुष्ठाभ्यां नमः | हृदयाय नमः |
| क्लीं श्रीं सौः ऐं | तर्जनीभ्यां स्वाहाः | शिरसे स्वाहा |
| सौः ॐ ह्रीं श्रीं | मध्यमाभ्यां वषट् | शिखायै वषट् |
| ऐं कएईलह्रीं हसकहलह्रीं | अनामिकाभ्यां हुम् | कवचाय हुम् |
| क्लीं सकलह्रीं | कनिष्ठिकाभ्यां वौषट् | नेत्र-त्रयाय वौषट् |
| सौः सौः ऐं क्लीं ह्रीं श्रीं | करतल-कर-पृष्ठाभ्यां फट् | अस्त्राय फट् |

।। ध्यानम् ।।

बाल - व्यक्त - विभाकरामित - निभां भव्य - प्रदां भारतीम्,
ईषत् - फुल्ल - मुखाम्बुज - स्मित-करैराशा-भवान्धापहाम्।
पाशं साभयमंकुशं च वरदं सम्बिभ्रतीं भूतिदाम्,
भ्राजन्तीं चतुरम्बुजाकृति-करैर्भक्त्या भजे सुन्दरीम् ।।

।। हृदय-स्तोत्र-पाठ ।।

सुन्दरी सकल - कल्मषापहा, कोटि-कञ्ज-प्रिय-काम्य-कान्तिका ।
कोटि-कल्प-कृत-पुण्य-कर्मणा, पूजनीय-पद-पुण्य-पुष्करा ।।१।।
शर्वरीश-सम-सुन्दराननना, श्रीश - शक्ति - सुकृताश्रय - श्रिता ।
सज्जनानु-शरणीय-सत्-पदा, सङ्कटे सुर-गणैः सु-वन्दिता ।।२।।
या सुरासुर-रणे जयान्विता, आजघान जगदम्बिकाऽजिता ।
तां भजामि जगतां जनिं जयां, युद्ध-युक्त-दितिजान् सु-दुर्जयान् ।।३।।
योगिनां हृदय-सङ्गतां शिवां, योग - युक्त - मनसां यतात्मनाम् ।
जाग्रतीं जगति यत्नतो द्विजा, यां जपन्ति हृदि तां भजाम्यहम् ।।४।।
कल्पकास्तु कलयन्ति कालिकां, यत्-कला कलि-जनोपकारिकाम् ।
कौल-कालि-कलिताङ्घ्रि-कञ्जकां, तां भजामि कलि-कल्मषापहाम् ।।५।।
बालार्कानन्त - शोचिर्निज - तनु - किरणैर्दीपयन्तीं दिगन्तान्,
दीप्तैर्देदीप्यमानां दनुज-दल-वनानल्प-दावानलाभाम् ।
दान्तो दन्तोग्र-चित्तान् दलित-दिति-सुतान् दर्शनीयान् दुरन्तान्,
देवीं दीनार्द्र-चित्तां हृदि मुदित-मनाः सुन्दरीं संस्मरामि ।।६।।
धीरान् धन्यान् धरित्रीं धव-विधृत-शिरो-धूत-धूल्यब्ज-पादान्,
धृष्टान् धाराधराधो-विनिधृत-चपला-चारु-चन्द्रत्-प्रभाभाम् ।
धर्मान् धूतोपहारान् धरणि सुर-धवोद्धारिणीं ध्येय-रूपाम्,
धीमद्-धन्याऽति-धन्यां घनद-घन-वृतां सुन्दरीं चिन्तयामि ।।७।।
जयतु जयतु जल्पा योगिनी योग-युक्ता, जयतु जयतु सौम्या सुन्दरी सुन्दरास्या ।
जयतु जयतु पद्मा पद्मिनी केशवस्य,जयतु जयतु काली कालिनी काल-कान्ता ।।८।।
जयतु जयतु खर्वा षोडशी वेद-हस्ता, जयतु जयतु धात्री धर्मिणी धातृ-शक्तिः ।
जयतु जयतु वाणी ब्राह्मणा ब्रह्म-वन्द्या, जयतु जयतु दुर्गा दारिणी देव-शत्रोः।।९।।
देवी त्वं सृष्टि - काले कमल - भव - भृता राजसी रक्त-रूपा,
रक्षा - काले त्वमम्बा हरि-हृदय - धृता सात्त्विकी श्वेत-रूपा।
भूरि - क्रोधा भवान्ते भव - भवन - गता तामसी कृष्ण-रूपा,
एताश्चान्यास्त्वमेव क्षिति - मनुज - मता सुन्दरी केवलाद्या।।१०।।
सुमल - सुमनमेतद् देवि! गोप्यं गुणज्ञे, ग्रहण - मनन - योग्यं षोडशीयं खलघ्नम्।
सुर-तरु-सम-शीलं सम्प्रदं पाठकानां, प्रभवति हृदयाख्यं स्तोत्रमत्यन्त-मान्यम्।।११।।
इदं त्रिपुर-सुन्दर्याः षोडश्याः परमाद्भुतं, यः शृणोति नरः स्तोत्रं स सदा सुखमश्नुते ।।१२।।

।। श्रीत्रिपुर-सुन्दरी-तन्त्रे हृदयाख्यं स्तोत्रम् ।।

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीषोडशी-अष्टोत्तर-शत-नाम-स्तोत्र-साधना

चतुर्वक्त्र जगन्नाथ!, स्तोत्रं वद मम प्रभो।
यस्यानुष्ठान-मात्रेण, नरो भक्तिमवाप्नुयात् ।।१।।
सहस्र-नाम्नामाकृष्य, नाम्नामष्टोत्तरं शतम्।
गुह्याद्-गुह्यतरं गुह्यं, सुन्दर्याः परि-कीर्तितम् ।।२।।

।। विनियोग ।।

ॐ अस्य श्रीषोडश्यष्टोत्तर-शत-नाम-स्तोत्रस्य श्री शम्भुः ऋषिः। अनुष्टुप् छन्दः । श्रीषोडशी देवता । धर्मार्थ-काम-मोक्ष-सिद्धये पाठे विनियोगः ।

।। ऋष्यादि-न्यास ।।

श्रीशम्भु-ऋषये नमः शिरसि । अनुष्टुप्-छन्दसे नमः मुखे। श्रीषोडशी-देवतायै नमः हृदये। धर्मार्थ-काम-मोक्ष-सिद्धये पाठे विनियोगाय नमः सर्वांगे।

।। ध्यान ।।

बालार्क-मण्डलाभासां, चतुर्बाहां त्रि-लोचनाम् ।
पाशांकुश-शरांश्चापं, धारयन्तीं शिवां भजे ।।

।। अष्टोत्तर-शत-नाम ।।

ॐत्रिपुरा[१] षोडशी[२] माता[३], त्र्यक्षरा[४] त्रितया[५] त्रयी[६]।
सुन्दरी[७] सुमुखी[८] सेव्या[९], साम-वेद-परायणा[१०] ।।१।।
शारदा[११] शब्द-निलया[१२], सागरा[१३] सरिदम्बरा[१४]।
शुद्धा[१५] शुद्ध-तनुः[१६] साध्वी[१७], शिव-ध्यान-परायणा[१८]।।२।।
स्वामिनी[१९] शम्भु-वनिता[२०], शाम्भवी[२१] च सरस्वती[२२]।
समुद्र-मथिनी[२३] शीघ्र-गामिनी[२४] शीघ्र-सिद्धिदा[२५] ।।३।।
साधु-सेव्या[२६] साधु-गम्या[२७], साधु-सन्तुष्ट-मानसा[२८]।
खट्वाङ्ग-धारिणी[२९] खर्वा[३०], खड्ग-खर्पर-धारिणी[३१] ।।४।।
षड्-वर्ग-भाव-रहिता[३२], षड्-वर्ग-परिचारिका[३३]।
षड्-वर्गा[३४] च षडङ्गा[३५] च, षोढा[३६] षोडश-वार्षिकी[३७] ।।५।।
ऋतु-रूपा[३८] क्रतु-मती[३९], ऋभुक्ष-क्रतु-मण्डिता[४०]।
कवर्गादि-पवर्गान्ता[४१], अन्तःस्था[४२] अन्त-रूपिणी[४३] ।।६।।

अकाराकार-रहिता[४४], काल-मृत्यु-जरा-पहा[४५]।
तन्वी[४६] तत्त्वेश्वरी[४७] तारा[४८], त्रि-वर्षा[४९] ज्ञान-रूपिणी[५०] ।।७।।
काली[५१] कराली[५२] कामेशी[५३], च छाया-संज्ञाप्यरुन्धती[५४-५६]।
निर्विकल्पा[५७] महा-वेगा[५८], महोत्साहा[५९] महोदरी[६०] ।।८।।
मेधा[६१] बलाका[६२] विमला[६३], विमल-ज्ञान-दायिनी[६४]।
गौरी[६५] वसुन्धरा[६६] गोप्त्री[६७], गवां पति-निषेविता[६८] ।।९।।
भगाङ्गा[६९] भग-रूपा[७०] च, भक्ति-भाव-परायणा[७१-७२]।
छिन्न-मस्ता[७३] महा-धूमा[७४], तथा धूम्र-विभूषणा[७५] ।।१०।।
धर्म-कर्मादि-रहिता[७६], धर्म-कर्म-परायणा[७७]।
सीता[७८] मातङ्गिनी[७९] मेधा[८०], मधु-दैत्य-विनाशिनी[८१] ।।११।।
भैरवी[८२] भुवना[८३] माताऽभयदा[८४-८५] भव - सुन्दरी[८६]।
भावुका[८७] बगला[८८] कृत्या[८९], बाला[९०] त्रिपुर-सुन्दरी[९१] ।।१२।।
रोहिणी[९२] रेवती[९३] रम्या[९४], रम्भा[९५] रावण-वन्दिता[९६]।
शत-यज्ञ-मयी[९७] सत्त्वा[९८], शत-क्रतु-वर-प्रदा[९९] ।।१३।।
शत-चन्द्रानना देवी[१००], सहस्रादित्य-सन्निभा[१०१]।
सोम-सूर्याग्नि-नयना[१०२-१०३], व्याघ्र-चर्माम्बरावृता[१०४]।
अर्द्धेन्दु-धारिणी[१०५] मत्ता[१०६], मदिरा[१०७] मदिरेक्षणा[१०८]।।१४।।

।। फल-श्रुति ।।

इति ते कथितं गोप्यं, नाम्नामष्टोत्तरं शतम् ।
सुन्दर्याः सर्वदा सेव्यं, महा-पातक-नाशनम्।
गोपनीयं गोपनीयं, गोपनीयं कलौ युगे ।।१।।
सहस्र-नाम-पाठस्य, फलं यद् वै प्रकीर्तितम्।
तस्मात् कोटि-गुणं पुण्यं, स्तवस्यास्य प्रकीर्तनात् ।।२।।
पठेत् सदा भक्ति-युतो नरो तु यो निशीथ-कालेऽप्यरुणोदये वा।
प्रदोष-काले नवमी-दिनेऽथवा लभेत् भोगान् परमाद्भुतान् प्रियान् ।।३।।

।। ब्रह्म-यामले षोडश्यष्टोत्तर-शत-नाम-स्तोत्रम्।।

★★★

# श्रीषोडशी-अष्टोत्तर-शत-नामावली-जप-साधना

'श्रीषोडशी-अष्टोत्तर-शत-नाम-साधना' में दिए गए 'विनियोगादि' को कर, यहाँ प्रकाशित 'नामों' का जप करना चाहिए। 'विनियोगादि' में 'पाठे' के स्थान पर 'जपे' कहना चाहिए।

१. श्रीत्रिपुरायै नमः। २. श्रीषोडश्यै नमः। ३. श्रीमात्रे नमः। ४. श्रीत्र्यक्षरायै नमः। ५. श्रीत्रितयायै नमः। ६. श्रीत्रय्यै नमः। ७. श्रीसुन्दर्यै नमः। ८. श्रीसुमुख्यै नमः। ९. श्रीसेव्यायै नमः। १०. श्रीसाम-वेद-परायणायै नमः। ११. श्रीशारदायै नमः। १२. श्रीशब्द-निलयायै नमः। १३. श्रीसागरायै नमः। १४. श्रीसरिदम्बरायै नमः। १५. श्रीशुद्धायै नमः। १६. श्रीशुद्ध-तनवे नमः। १७. श्रीसाध्व्यै नमः। १८. श्रीशिव-ध्यान-परायणायै नमः। १९. श्रीस्वामिन्यै नमः। २०. श्रीशम्भु-वनितायै नमः। २१. श्रीशाम्भव्यै नमः। २२. श्रीसरस्वत्यै नमः। २३. श्रीसमुद्र-मथिन्यै नमः। २४. श्रीशीघ्र-गामिन्यै नमः। २५. श्रीशीघ्र-सिद्धिदायै नमः।

२६. श्रीसाधु-सेव्यायै नमः। २७. श्रीसाधु-गम्यायै नमः। २८. श्रीसाधु-सन्तुष्ट-मानसायै नमः। २९. श्रीखट्वाङ्ग-धारिण्यै नमः। ३०. श्रीखर्वायै नमः। ३१. श्रीखड्ग-खर्पर-धारिण्यै नमः। ३२. श्रीषड्-वर्ग-भाव-रहितायै नमः। ३३. श्रीषड्-वर्ग-परिचारिकायै नमः। ३४. श्रीषड्-वर्गायै नमः। ३५. श्रीषडङ्गायै नमः। ३६. श्रीषोढायै नमः। ३७. श्रीषोडश-वार्षिक्यै नमः। ३८. श्रीऋतु-रूपायै नमः। ३९. श्रीक्रतु-मत्यै नमः। ४०. श्रीऋभुक्ष-क्रतु-मण्डितायै नमः। ४१. श्रीकवर्गादि-पवर्गान्तायै नमः। ४२. श्रीअन्तःस्थायै नमः। ४३. श्रीअन्त-रूपिण्यै नमः। ४४. श्रीअकाराकार-रहितायै नमः। ४५. श्रीकाल-मृत्यु-जरा-पहायै नमः। ४६. श्रीतन्व्यै नमः। ४७. श्रीतत्त्वेश्वर्यै नमः। ४८. श्रीतारायै नमः। ४९. श्रीत्रि-वर्षायै नमः। ५०. श्रीज्ञान-रूपिण्यै नमः।

५१. श्रीकाल्यै नमः। ५२. श्रीकरालयै नमः। ५३. श्रीकामेश्यै नमः। ५४. श्रीछायायै नमः। ५५. श्रीसंज्ञायै नमः। ५६. श्रीअरुन्धत्यै नमः। ५७. श्रीनिर्विकल्पायै नमः। ५८. श्रीमहा-वेगायै नमः। ५९. श्रीमहोत्साहायै नमः। ६०. श्रीमहोदर्यै नमः। ६१. श्रीमेधायै नमः। ६२. श्रीबलाकायै नमः। ६३. श्रीविमलायै नमः। ६४. श्रीविमल-ज्ञान-दायिन्यै नमः। ६५. श्रीगौर्यै नमः। ६६. श्रीवसुन्धरायै नमः। ६७. श्रीगोप्त्र्यै नमः। ६८. श्रीगवाम्पति-निषेवितायै नमः। ६९. श्रीभगाङ्गायै नमः। ७०. श्रीभग-रूपायै नमः। ७१. श्रीभक्ति-परायणायै नमः। ७२. श्रीभाव-परायणायै नमः। ७३. श्रीछिन्न-मस्तायै नमः। ७४. श्रीमहा-धूमायै नमः। ७५. श्रीधूम्र-विभूषणायै नमः।

७६. श्रीधर्म-कर्मादि-रहितायै नमः। ७७. श्रीधर्म-कर्म-परायणायै नमः। ७८. श्रीसीतायै नमः। ७९. श्रीमातङ्ग्यै नमः। ८०. श्रीमेधायै नमः। ८१. श्रीमधु-दैत्य-विनाशिन्यै नमः। ८२. श्रीभैरव्यै नमः। ८३. श्रीभुवनायै नमः। ८४. श्रीमात्रे नमः। ८५. श्रीअभयदायै नमः। ८६. श्रीभव-सुन्दर्यै नमः। ८७. श्रीभावुकायै नमः। ८८. श्रीबगलायै नमः। ८९. श्रीकृत्यायै नमः। ९०. श्रीबालायै नमः। ९१. श्रीत्रिपुर-सुन्दर्यै नमः। ९२. श्रीरोहिण्यै नमः। ९३. श्रीरेवत्यै नमः। ९४. श्रीरम्यायै नमः। ९५. श्रीरम्भायै नमः। ९६. श्रीरावण-वन्दितायै नमः। ९७. श्रीशत-यज्ञ-मय्यै नमः। ९८. श्रीसत्त्वायै नमः। ९९. श्रीशत-क्रतु-वर-प्रदायै नमः। १००. श्रीशत-चन्द्रानना-देव्यै नमः।

१०१. श्रीसहस्रादित्य-सन्निभायै नमः। १०२. श्रीसोम-नयनायै नमः। १०३. श्रीसूर्याग्नि-नयनायै नमः। १०४. श्रीव्याघ्र-चर्माम्बरावृतायै नमः। १०५. श्रीअर्द्धेन्दु-धारिण्यै नमः। १०६. श्रीमत्तायै नमः। १०७. श्रीमदिरायै नमः। १०८. श्रीमदिरेक्षणायै नमः।

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीषोडशी-सहस्र-नाम-स्तोत्र-साधना

।। पूर्व-पीठिका ।।

कैलास-शिखरे रम्ये, नाना-रत्नोप-शोभिते।
कल्प-पादप-मध्यस्थे, नाना-पुष्पोप-शोभिते ।।१।।
मणि-मण्डप-मध्यस्थे, मुनि-गन्धर्व-सेविते।
कदाचित् सुखमासीनं, भगवन्तं जगद्-गुरुम् ।।२।।
कपाल-खट्वाङ्ग-धरं, चन्द्रार्ध-कृत - शेखरम्।
हस्त-त्रिशूल-डमरुं, महा-वृषभ-वहनम् ।।३।।
जटा-जूट-धरं देवं, कण्ठ-भूषण - वासुकिम्।
विभूति-भूषणं देवं, नील-कण्ठं त्रि-लोचनम् ।।४।।
द्वीपि-चर्म-परीधानं, शुद्ध-स्फटिक-सन्निभम्।
सहस्रादित्य-सङ्काशं, गिरिजार्द्धाङ्ग-भूषणम् ।।५।।
प्रणम्य शिरसा नाथं, कारणं विश्व-रूपिणम्।
कृताञ्जलि-पुटो भूत्वा, प्राहैनं शिख-वाहनः ।।६।।

।। कार्तिकेय उवाच ।।

देव-देव जगन्नाथ!, सृष्टि-स्थिति-लयात्मक।
त्वमेव परमात्मा च, त्वं गतिः सर्व-देहिनाम् ।।७।।
त्वं गतिः सर्व-लोकानां, दीनानां च त्वमेव हि।
त्वमेव जगदाधारस्त्वमेव विश्व-कारणम् ।।८।।
त्वमेव पूज्यः सर्वेषां, त्वदन्यो नास्ति मे गतिः।
किं गुह्यं परमं लोके, किमेकं सर्व-सिद्धिदम् ।।९।।
किमेकं परमं श्रेष्ठं, को योगः स्वर्ग-मोक्षदः।
विना तीर्थेन तपसा, विना दानैर्विना मखैः ।।१०।।
विना लयेन ध्यानेन, नरः सिद्धिमवाप्नुयात्।
कस्मादुत्पद्यते सृष्टिः, कस्मिंश्च प्रलयो भवेत् ।।११।।
कस्मादुत्तीर्यते देव!, संसारार्णव - सङ्कटात्।
तदऽहं श्रोतुमिच्छामि, कथयस्व महेश्वर! ।।१२।।

।। ईश्वर उवाच ।।

साधु साधु त्वया पृष्टं, पार्वती-प्रिय-नन्दन।
अस्ति गुह्य-तमं पुत्र!, कथयिष्याम्यसंशयम् ।।१३।।

सत्त्वं रजस्तमश्चैव, ये चान्ये महदादयः।
ये चान्ये बहवो भूताः, सर्वे प्रकृति-सम्भवाः ।।१४।।
सैव देवी परा-शक्तिः, महा-त्रिपुर-सुन्दरी।
सैव प्रसूयते विश्वं, विश्वं सैव प्रपास्यति ।।१५।।
सैव संहरते विश्वं, जगदेतच्चराचरम्।
आधारः सर्व-भूतानां, सैव रोगार्ति - हारिणी ।।१६।।
इच्छा-ज्ञान-क्रिया-शक्तिः, ब्रह्म-विष्णु-शिवात्मिका।
त्रिधा शक्ति-स्वरूपेण, सृष्टि-स्थिति-विनाशिनी ।।१७।।
सृज्यते ब्रह्म-रूपेण, विष्णु - रूपेण पाल्यते।
ह्रियते रुद्र - रूपेण, जगदेतच्चराचरम् ।।१८।।
यस्या योनौ जगत्-सर्वमद्यापि परिवर्तते।
यस्यां प्रलीयते चान्ते, यस्यां च जायते पुनः ।।१९।।
यां समाराध्य त्रैलोक्ये, सम्प्राप्यं पदमुत्तमम्।
तस्या नाम-सहस्रं तु, कथयामि शृणुष्व तत् ।।२०।।

।। विनियोग ।।

ॐ अस्य श्रीमहा-त्रिपुर-सुन्दरी-सहस्र-नाम-स्तोत्र-मन्त्रस्य श्रीभगवान् दक्षिणा-मूर्तिः ऋषिः। जगतीच्छन्दः। समस्त-प्रकट-गुप्त-सम्प्रदाय-कुल-कौलोत्तीर्ण-निर्गर्भ- रहस्याचिन्त्य-प्रभावती देवता। ॐ वीजं। ह्रीं शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे पाठे विनियोगः।

।। ऋष्यादि-न्यास ।।

ॐश्रीमहा-त्रिपुर-सुन्दरी-सहस्र-नाम-स्तोत्र-मन्त्रस्य श्रीभगवान् दक्षिणा-मूर्ति-ऋषये नमः शिरसि। ॐजगतीच्छन्दसे नमः मुखे। ॐसमस्त-प्रकट-गुप्त-सम्प्रदाय- कुल-कौलोत्तीर्ण-निर्गर्भ-रहस्याचिन्त्य-प्रभावती-देवतायै नमः हृदये। ॐॐ-वीजाय नमः नाभौ। ॐह्रीं-शक्तये नमः गुह्ये। ॐक्लीं-कीलकाय नमः पादयोः। ॐधर्मार्थ-काम-मोक्षार्थे पाठे विनियोगाय नमः सर्वाङ्गे।

।। ध्यान ।।

ॐ आधारे तरुणार्क-बिम्ब-रुचिरं हेम-प्रभं वाग्भवम्।
बीजं मन्मथमिन्द्र-गोप-सदृशं हृत्-पङ्कजे संस्थितम् ।।
विष्णु-ब्रह्म-पदस्थ-शक्ति-कलितं सोम-प्रभा-भासुरम्।
ये ध्यायन्ति पद-त्रयं तव शिवे! ते यांति सौख्यं पदम् ।।

।। मानस-पूजन ।।

ॐ लं पृथिव्यात्मकं गन्धं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये समर्पयामि नमः।
ॐ हं आकाश-तत्त्वात्मकं पुष्पं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये समर्पयामि नमः।
ॐ यं वायु-तत्त्वात्मकं धूपं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये घ्रापयामि नमः।
ॐ रं अग्नि-तत्त्वात्मकं दीपं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये दर्शयामि नमः।
ॐ वं जल-तत्त्वात्मकं नैवेद्यं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये निवेदयामि नमः।
ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये समर्पयामि नमः।

।। मूल-पाठ ।।

कल्याणी[१] कमला[२] काली[३], करालीं[४] काम-रूपिणी[५]।
कामाख्या[६] कामदा[७] काम्या[८], कामना[९] काम-चारिणी[१०] ।।१।।
काल-रात्रिः[११] महा-रात्रिः[१२], कपाली[१३] काम-रूपिणी[१४]।
कौमारी[१५] करुणा[१६] मुक्तिः, कलि - कल्मष - नाशिनी[१७] ।।२।।
कात्यायनी[१८] कराधारा[१९], कौमुदी[२०] कमल - प्रिया[२१]।
कीर्तिदा[२२] बुद्धिदा[२३] मेधा[२४], नीतिज्ञा[२५] नीति-वत्सला[२६] ।।३।।
माहेश्वरी[२७] महा-माया[२८], महा-तेजा[२९] महेश्वरी[३०]।
महा-जिह्वा[३१] महा-घोरा[३२], महा-दंष्ट्रा[३३] महा-भुजा[३४] ।।४।।
महा - मोहान्धकारघ्नी[३५], महा - मोक्ष - प्रदायिनी[३६]।
महा - दारिद्र्य - नाशा[३७] च, महा - शत्रु - विमर्दिनी[३८] ।।५।।
महा-माया[३९] महा-वीर्या[४०], महा-पातक-नाशिनी[४१]।
महा - मखा[४२] मन्त्र - मयी[४३], मणि - पूरक - वासिनी[४४] ।।६।।
मानसी[४५] मानदा[४६] मान्या[४७], मनश्चक्षू-रणे-चरा[४८]।
गण - माता[४९] च गायत्री[५०], गण - गन्धर्व - सेविता[५१] ।।७।।
गिरिजा[५२] गिरिशा[५३] साध्वी[५४], गिरिस्था[५५] गिरि-वल्लभा[५६] ।
चण्डेश्वरी[५७] चण्ड-रूपा[५८], प्रचण्डा[५९] चण्ड-मालिनी[६०] ।।८।।
चर्विका[६१] चर्चिकाकारा[६२], चण्डिका[६३] चारु-रूपिणी[६४]।
यज्ञेश्वरी[६५] यज्ञ-रूपा[६६], जप-यज्ञ-परायणा[६७] ।।९।।

यज्ञ - माता[६८] यज्ञ - भोक्त्री[६९], यज्ञेशी[७०] यज्ञ - सम्भवा[७१]।
सिद्ध-यज्ञा[७२]-क्रिया-सिद्धिर्यज्ञाङ्गी[७३-७४] यज्ञ-रक्षिका[७५] ।।१०।।
यज्ञ - क्रिया[७६] च यज्ञा[७७] च, यज्ञा - यज्ञ - क्रियालया[७८]।
जालन्धरी[७९] जगन्माता[८०], जात - वेदा[८१] जगत् - प्रिया[८२]।।११।।
जितेन्द्रिया[८३] जित - क्रोधा[८४], जननी[८५] जन्म-दायिनी[८६] ।
गङ्गा[८७] गोदावरी[८८] चैव, गोमती[८९] च शतद्रुका[९०]।।१२।।
घर्घरा[९१] वेद - गर्भा[९२] च, रेचिका[९३] सम - वासिनी[९४] ।
सिन्धुर्मन्दाकिनी[९५-९६] क्षिप्रा[९७], यमुना[९८] च सरस्वती[९९]।।१३।।
भद्रा[१००] रागा[१०१] विपाशा[१०२] च, गण्डकी[१०३] विन्ध्य-वासिनी[१०४] ।
नर्मदा[१०५] ताप्ती[१०६] कावेरी[१०७], वेत्र-वत्या[१०८] सु-कौशिकी[१०९]।।१४।।
महेन्द्र - तनया[११०] चैव, अहल्या[१११] चर्मकावती[११२] ।
अयोध्या[११३] मथुरा[११४] माया[११५],काशी[११६] काञ्ची[११७] अवन्तिका[११८] ।।१५।।
पुरी[११९] द्वारावती[१२०] तीर्था[१२१], महा-किल्विष-नाशिनी[१२२] ।
पद्मिनी[१२३] पद्म-मध्यस्था[१२४], पद्म-किञ्जल्क-वासिनी[१२५]।।१६।।
पद्म-वक्त्रा[१२६] चकोराक्षी[१२७], पद्मस्था[१२८] पद्म-सम्भवा[१२९] ।
ह्रीङ्कारी[१३०] कुण्डला-धारा[१३१], हृत्-पद्मस्था[१३२] सु-लोचना[१३३] ।।१७।।
श्रीङ्कारी[१३४] भूषणा[१३५] लक्ष्मी:[१३६], क्लीङ्कारी[१३७] क्लेश-नाशिनी[१३८] ।
हरि - वक्त्रोद्भवा[१३९] शान्ता[१४०], हरि - वक्त्र - कृतालया[१४१] ।।१८।।
हरि-वक्त्रोपमा[१४२] हाला[१४३] , हरि-वक्ष:-स्थला-स्थिता[१४४] ।
वैष्णवी[१४५] विष्णु-रूपा[१४६] च, विष्णु-मातृ-स्वरूपिणी[१४७] ।।१९।।
विष्णु-माया[१४८] विशालाक्षी[१४९] , विशाल-नयनोज्ज्वला[१५०] ।
विंश्वेश्वरी[१५१] च विश्वात्मा[१५२], विश्वेशी[१५३] विश्व-रूपिणी[१५४]।।२०।।
विश्व-नाथा[१५५] शिवाराध्या[१५६], शिव-नाथा[१५७] शिव-प्रिया[१५८] ।
शिव-माता[१५९] शिवाख्या[१६०] च, शिवदा[१६१] शिव-रूपिणी[१६२]।।२१।।

भवेश्वरी[१६३] भवाराध्या[१६४], भवेशी[१६५] भव - नायिका[१६६] ।
भव - माता[१६७] भव - गम्या[१६८], भव - कण्टक - नाशिनी[१६९]।।२२।।
भव - प्रिया[१७०] भवानन्दा[१७१], भवानी[१७२] भव - मोहिनी[१७३] ।
गायत्री[१७४] चैव सावित्री[१७५], ब्रह्माणी[१७६] ब्रह्म-रूपिणी[१७७]।।२३।।
ब्रह्मेशी[१७८] ब्रह्मदा[१७९] ब्रह्मा[१८०], ब्रह्माणी[१८१] ब्रह्म-वादिनी[१८२] ।
दुर्गस्था[१८३] दुर्ग-रूपा[१८४] च, दुर्गा[१८५] दुर्गार्ति-नाशिनी[१८६]।।२४।।
सुगमा[१८७] दुर्गमा[१८८] दान्ता[१८९], दया[१९०] दोग्ध्री[१९१] दुरापहा[१९२] ।
दुरितघ्नी[१९३] दुराध्यक्षा[१९४], दुरा[१९५] दुष्कृत-नाशिनी[१९६]।।२५।।
पञ्चास्या[१९७] पञ्चमी[१९८] पूर्णा[१९९], पूर्ण-पीठ-निवासिनी[२००] ।
सत्त्वस्था[२०१] सत्त्व-रूपा[२०२] च, सत्त्वगा[२०३] सत्त्व-सम्भवा[२०४]।।२६।।
रजस्था[२०५] च रजो-रूपा[२०६], रजो-गुण-समुद्भवा[२०७] ।
तमस्था[२०८] च तमो-रूपा[२०९], तामसी[२१०] तामस-प्रिया[२११]।।२७।।
तमो-गुण-समुद्भूता[२१२], सात्विकी[२१३] राजसी[२१४] कला[२१५] ।
काष्ठा[२१६] मुहूर्ता[२१७] निमिषा[२१८], अनिमेषा[२१९] ततः परम्।।२८।।
अर्द्ध - मासा[२२०] च मासा[२२१] च, संवत्सर - स्वरूपिणी[२२२] ।
योगस्था[२२३] योग-रूपा[२२४] च, कल्पस्था[२२५] कल्प-रूपिणी[२२६]।।२९।।
नाना - रत्न - विचित्राङ्गी[२२७], नानाऽऽभरण - मण्डिता[२२८] ।
विश्वात्मिका[२२९] विश्व-माता[२३०], विश्व-पाश-विनाशिनी[२३१]।।३०।।
विश्वास-कारिणी[२३२] विश्वा[२३३], विश्व-शक्ति-विचारणा[२३४] ।
जपा - कुसुम - सङ्काशा[२३५], दाडिमी - कुसुमोपमा[२३६]।।३१।।
चतुरङ्गी[२३७] चतुर्बाहुश्चतुराचार - वासिनी[२३८-२३९] ।
सर्वेशी[२४०] सर्वदा[२४१] सर्वा[२४२], सर्वदा-सर्व-दायिनी[२४३]।।३२।।
माहेश्वरी[२४४] च सर्वाद्या[२४५], शर्वाणी[२४६] सर्व - मङ्गला[२४७] ।
नलिनी[२४८] नन्दिनी[२४९] नन्दा[२५०], आनन्दानन्द-वर्द्धिनी[२५१-२५२]।।३३।।

व्यापिनी सर्व - भूतेषु[२५३], भव - भार - विनाशिनी[२५४] ।
सर्व - शृङ्गार - वेषाढ्या[२५५], पाशांकुश - करोद्यता[२५६]।।३४।।
सूर्य - कोटि - सहस्राभा[२५७], चन्द्र - कोटि - निभानना[२५८] ।
गणेश - कोटि - लावण्या[२५९], विष्णु - कोट्यरि - मर्दिनी[२६०]।।३५।।
दावाग्नि - कोटि - दलिनी[२६१], रुद्र - कोट्युग्र - रूपिणी[२६२] ।
समुद्र - कोटि - गम्भीरा[२६३], वायु - कोटि - महा - बला[२६४]।।३६।।
आकाश - कोटि - विस्तारा[२६५], यम - कोटि - भयङ्करी[२६६] ।
मेरु - कोटि - समुच्छ्राया[२६७], गण - कोटि - समृद्धिदा[२६८]।।३७।।
निष्कस्तोका[२६९] निराधारा[२७०], निर्गुणा[२७१] गुण-वर्जिता[२७२] ।
अशोका[२७३] शोक - रहिता[२७४], ताप - त्रय - विवर्जिता[२७५]।।३८।।
वसिष्ठा[२७६] विश्व-जननी[२७७], विश्वाख्या[२७८] विश्व-वर्द्धिनी[२७९] ।
चित्रा[२८०] विचित्र-चित्राङ्गी[२८१], हेतु-गर्भा[२८२] कुलेश्वरी[२८३]।।३९।।
इच्छा-शक्ति:[२८४] ज्ञान-शक्ति:[२८५], क्रिया-शक्ति:[२८६] शुचि-स्मिता[२८७] ।
शुचि:[२८८] स्मृति-मयी[२८९] सत्या[२९०], श्रुति-रूपा[२९१] श्रुति-प्रिया[२९२]।।४०।।
महा - सत्त्व-मयी[२९३] सत्त्वा[२९४], पञ्च - तत्त्वोपरि - स्थिता[२९५] ।
पार्वती[२९६] हिमवत्-पुत्री[२९७], पारस्था[२९८] पार-रूपिणी[२९९]।।४१।।
जयन्ती[३००] भद्र-काली[३०१] च, अहल्या[३०२] कुल-नायिका[३०३] ।
भूत-धात्री[३०४] च भूतेशी[३०५], भूतस्था[३०६] भूत-भाविनी[३०७]।।४२।।
महा - कुण्डलिनी - शक्ति:[३०८], महा - विभव - वर्द्धिनी[३०९] ।
हंसाक्षी[३१०] हंस-रूपा[३११] च, हंसस्था[३१२] हंस-रूपिणी[३१३]।।४३।।
सोम - सूर्याग्नि - मध्यस्था[३१४-३१५], मणि-मण्डल-वासिनी[३१६] ।
द्वादशार - सरोजस्था[३१७], सूर्य - मण्डल - वासिनी[३१८]।।४४।।
अकलङ्का[३१९] शशाङ्काभा[३२०],षोडशार - निवासिनी[३२१] ।
डाकिनी[३२२] राकिनी[३२३] चैव, लाकिनी[३२४] काकिनी[३२५] तथा।।४५।।

शाकिनी[३२६] हाकिनी[३२७] चैव, षट् - चक्रेषु - निवासिनी ।
सृष्टि-स्थिति-विनाशिनी[३२८], सृष्ट्यन्ता[३२९] सृष्टि-कारिणी[३३०] ।।४६।।
श्री-कण्ठ-प्रिया[३३१] हृत्कण्ठा[३३२], नन्दाख्या[३३३] विन्दु-मालिनी[३३४] ।
चतुष्षटि - कलाधारा[३३५], देह - दण्ड - समाश्रिता[३३६] ।।४७।।
माया[३३७] काली[३३८] धृतिर्मेधा[३३९-३४०], क्षुधा[३४१] तुष्टिर्महा-द्युतिः[३४२-३४३] ।
हिंगुला[३४४] मङ्गला[३४५] सीता[३४६], सुषुम्ना-मध्य-गामिनी[३४७] ।।४८।।
पर - घोरा[३४८] करालाक्षी[३४९], विजया[३५०] जय - दायिनी[३५१] ।
हृत्-पद्म-निलया[३५२] भीमा[३५३], महा - भैरव - नादिनी[३५४] ।।४९।।
आकाश - लिङ्ग - सम्भूता[३५५], भुवनोद्यान - वासिनी[३५६] ।
महत्-सूक्ष्मा[३५७] च कङ्काली[३५८], भीम-रूपा[३५९] महा-बला[३६०] ।।५०।।
मेनका - गर्भ - सम्भूता[३६१], तप्त - काञ्चन - सन्निभा[३६२] ।
अन्तरस्था[३६३] कूट - बीजा[३६४], त्रिकूटाचल - वासिनी[३६५] ।।५१।।
वर्णाख्या[३६६] वर्ण - रहिता[३६७], पञ्चाशद्वर्ण - भेदिनी[३६८] ।
विद्याधरी[३६९] लोक-धात्री[३७०], अप्सरा[३७१] अप्सरः - प्रिया[३७२] ।।५२।।
दीक्षा[३७३] दाक्षायणी[३७४] दक्षा[३७५], दक्ष-यज्ञ-विनाशिनी[३७६] ।
यशः - पूर्णा[३७७] यशोदा[३७८] च, यशोदा - गर्भ - सम्भवा[३७९] ।।५३।।
देवकी[३८०] देव - माता[३८१] च, राधिका कृष्ण - वल्लभा[३८२] ।
अरुन्धती[३८३] शचीन्द्राणी[३८४-३८५], गान्धारी[३८६] गन्ध-मालिनी[३८७] ।।५४।।
ध्यानातीता[३८८], ध्यान-गम्या[३८९], ध्यानज्ञा[३९०] ध्यान-धारिणी[३९१] ।
लम्बोदरी[३९२] च लम्बोष्ठी[३९३], जाम्बवन्ती[३९४] जलोदरी[३९५] ।।५५।।
महोदरी[३९६] मुक्त - केशी[३९७], मुक्त - कामार्थ - सिद्धिदा[३९८] ।
तपस्विनी[३९९] तपो - निष्ठा[४००], सुपर्णा[४०१] धर्म - वासिनी[४०२] ।।५६।।
बाण-चाप-धरा[४०३] धीरा[४०४], पाञ्चाली[४०५] पञ्चम-प्रिया[४०६] ।
गुह्याङ्गी[४०७] च सु-भीमाङ्गी[४०८], गुह्य-तत्त्वा[४०९] निरञ्जना[४१०] ।।५७।।

अशरीरा[४११] शरीरस्था[४१२], संसारार्णव - तारिणी[४१३] ।
अमृता[४१४] निष्कला[४१५] भद्रा[४१६], सकला[४१७] कृष्ण-पिङ्गला[४१८]।।५८।।
चक्र-प्रिया[४१९] च चक्राह्वा[४२०], पञ्च-चक्रादि-दारिणी[४२१] ।
पद्म - राग - प्रतीकाशा[४२२], निर्मलाकाश - सन्निभा[४२३]।।५९।।
अधःस्था[४२४] ऊर्ध्व-रूपा[४२५] च, ऊर्ध्व - पद्म - निवासिनी[४२६] ।
कार्य - कारण - कर्तृत्वे, शश्वद् - रूपेषु - संस्थिता[४२७]।।६०।।
रसज्ञा[४२८] रस - मध्यस्था[४२९] गन्धस्था[४३०] गन्ध - रूपिणी[४३१] ।
पर - ब्रह्म - स्वरूपा[४३२] च, पर - ब्रह्म - निवासिनी[४३३]।।६१।।
शब्द - ब्रह्म - स्वरूपा[४३४] च, शब्दस्था[४३५] शब्द - वर्जिता[४३६] ।
सिद्धिः[४३७] बुद्धिः[४३८] परा-बुद्धिः[४३९], सन्दीप्तिर्मध्य - संस्थिता[४४०]।।६२।।
स्व-गुह्या[४४१] शाम्भवी-शक्तिः[४४२], तत्त्वस्था[४४३] तत्त्व-रूपिणी[४४४] ।
शाश्वती[४४५] भूत-माता[४४६] च, महा - भूताधिप - प्रिया[४४७]।।६३।।
शुचि - प्रेता[४४८] धर्म - सिद्धिः[४४९], धर्म-वृद्धिः[४५०] पराजिता[४५१] ।
काम - सन्दीपिनी[४५२] कामा[४५३], सदा कौतूहल - प्रिया[४५४]।।६४।।
जटा - जूट - धरा[४५५] मुक्ता[४५६], सूक्ष्मा[४५७] शक्ति-विभूषणा[४५८] ।
द्वीपि - चर्म - परीधाना[४५९], चीर - वल्कल - धारिणी[४६०]।।६५।।
त्रिशूल - डमरु - धरा[४६१], नर - माला - विभूषणा[४६२] ।
अत्युग्ररूपिणी[४६३] चोग्रा[४६४], कल्पान्त - दहनोपमा[४६५]।।६६।।
त्रैलोक्य-साधिनी[४६६] साध्या[४६७], सिद्धि[४६८] साधक-वत्सला[४६९] ।
सर्व-विद्या-मयी[४७०] सारा[४७१], चासुराणां विनाशिनी[४७२]।।६७।।
दमनी[४७३] दामिनी[४७४] दान्ता[४७५], दया[४७६] दोग्ध्री[४७७] दुरापहा[४७८] ।
अग्नि - जिह्वोपमा[४७९] घोराघोर - घोर - तरानना[४८०]।।६८।।
नारायणी[४८१] नारसिंही[४८२], नृसिंह - हृदये - स्थिता[४८३] ।
योगेश्वरी[४८४] योग - रूपा[४८५], योग - माता[४८६] च योगिनी[४८७]।।६९।।

खेचरी[४८८] खचरी[४८९] खेला[४९०], निर्वाण - पद - संश्रया[४९१] ।
नागिनी[४९२] नाग-कन्या[४९३] च, सुवेशा[४९४] नाग-नायिका[४९५]।।७०।।
विष - ज्वालावती[४९६] दीप्ता[४९७], कला - शत - विभूषणा[४९८] ।
तीव्र-वक्त्रा[४९९] महा-वक्त्रा[५००], नाग - कोटित्व - धारिणी[५०१]।।७१।।
महा-सत्त्वा[५०२] च धर्मज्ञा[५०३], धर्माति - सुख - दायिनी[५०४] ।
कृष्ण - मूर्द्धा[५०५] महा - मूर्द्धा[५०६], घोर - मूर्द्धा[५०७] वरानना[५०८]।।७२।।
सर्वेन्द्रिय - मनोन्मत्ता[५०९], सर्वेन्द्रिय - मनो - मयी[५१०] ।
सर्व - संग्राम - जयदा[५११], सर्व - प्रहरणोद्यता[५१२]।।७३।।
सर्व - पीडोप - शमनी[५१३], सर्वारिष्ट - निवारिणी[५१४] ।
सर्वैश्वर्य - समुत्पन्ना[५१५], सर्व - ग्रह - विनाशिनी[५१६]।।७४।।
मातङ्गी[५१७] मत्त-मातङ्गी[५१८], मातङ्गी - प्रिय - मण्डला[५१९] ।
अमृतोदधि - मध्यस्था[५२०], कटि - सूत्रैरलंकृता[५२१]।।७५।।
अमृतोदधि - मध्यस्था, प्रवाल - वसनाम्बुजा[५२२] ।
मणि - मण्डल - मध्यस्था[५२३], ईषत् - प्रहसिताननना[५२४]।।७६।।
कुमुदा[५२५] ललिता[५२६] लोला[५२७], लाक्षा - लोहित - लोचना[५२८] ।
दिग्वासा[५२९] देवदूती[५३०] च, देव - देवाधि - देवता[५३१]।।७७।।
सिंहोपरि - समारूढा[५३२], हिमाचल - निवासिनी[५३३] ।
अट्टाट्ट - हासिनी[५३४] घोरा[५३५], घोर - दैत्य - विनाशिनी[५३६]।।७८।।
अत्युग्र - रक्त - वस्त्राभा[५३७], नाग - केयूर - मण्डिता[५३८] ।
मुक्ताहार - लतोपेता[५३९], तुङ्ग - पीन - पयोधरा[५४०]।।७९।।
रक्तोत्पल - दलाकारा[५४१], मदाघू र्णित - लोचना[५४२] ।
समस्त - देवता - मूर्ति:[५४३], सुरारि - क्षय - कारिणी[५४४]।।८०।।
खड्गिनी[५४५] शूल-हस्ता[५४६] च, चक्रिणी[५४७] चक्र-मालिनी[५४८] ।
शङ्खिनी[५४९] चापिणी[५५०] वाणा[५५१], वज्रिणी[५५२] वज्र-दण्डिनी[५५३]।।८१।।

आनन्दोदधि - मध्यस्था[५५४], कटि - सूत्र - धारा परा[५५५] ।
नानाभरण - दीप्ताङ्गा[५५६], नाना - मणि - विभूषिता[५५७]।।८२।।
जगदानन्द - सम्भूता[५५८], चिन्तामणि - गुणान्विता[५५९] ।
त्रैलोक्य - नमिता[५६०] तुर्या[५६१], चिन्मयानन्द - रूपिणी[५६२]।।८३।।
त्रैलोक्य - नन्दिनी देवी[५६३], दुःख - दुस्वप्न - नाशिनी[५६४] ।
घोराग्नि - दाह - शमनी[५६५], राज्य - देवार्थ - साधिनी[५६६]।।८४।।
महाऽपराध - राशिघ्नी[५६७], महा - चौर - भयापहा[५६८] ।
रागादि - दोष - रहिता[५६९], जरा - मरण - वर्जिता[५७०]।।८५।।
चन्द्र - मण्डल - मध्यस्था[५७१], पीयूषार्णव - सम्भवा[५७२] ।
सर्व - देवैः स्तुता देवी[५७३], सर्व - सिद्धैर्नमस्कृता[५७४]।।८६।।
अचिन्त्य - शक्ति - रूपा[५७५] च, मणि - मन्त्र - महौषधी[५७६] ।
अस्ति - स्वस्ति - मयी बाला[५७७], मलयाचल - वासिनी[५७८]।।८७।।
धात्री[५७९] विधात्री[५८०] संहारी[५८१], रतिज्ञा[५८२] रति-दायिनी[५८३] ।
रुद्राणी[५८४] रुद्र-रूपा[५८५] च, रुद्र-रौद्रार्ति-नाशिनी[५८६]।।८८।।
सर्वज्ञा[५८७] चैव धर्मज्ञा[५८८], रसज्ञा[५८९] दीन - वत्सला[५९०] ।
अनाहता[५९१] त्रि-नयना[५९२], निर्भारा[५९३] निर्वृतिः परा[५९४],।।८९।।
पराऽघोरा[५९५] करालाक्षी[५९६], सुमती[५९७] श्रेष्ठ - दायिनी[५९८] ।
मन्त्रालिका[५९९] मन्त्र-गम्या[६००], मन्त्र-माला[६०१] सु-मन्त्रिणी[६०२]।।९०।।
श्रद्धानन्दा[६०३] महा-भद्रा[६०४], निर्द्वन्द्वा[६०५] निर्गुणात्मिका[६०६] ।
धरिणी[६०७] धारिणी-पृथ्वी[६०८], धरा-धात्री[६०९] वसुन्धरा[६१०]।।९१।।
मेरु - मन्दर - मध्यस्था[६११], स्थितिः[६१२] शङ्कर - वल्लभा[६१३] ।
श्री-मती[६१४] श्री-मयी[६१५] श्रेष्ठा[६१६], श्री-करी[६१७] भाव-भाविनी[६१८]।।९२।।
श्री-दा[६१९] श्री-मा[६२०] श्री-निवासा[६२१], श्री-वती[६२२] श्री-मताङ्गतिः[६२३] ।
उमा[६२४] सारङ्गिणी कृष्णा[६२५], कुटिला[६२६] कुटिलालिका[६२७]।।९३।।

त्रि-लोचना[६२८] त्रि - लोकात्मा[६२९], पुण्यपुण्या - प्रकीर्तिता[६३०] ।
अमृता[६३१] सत्य-सङ्कल्पा[६३२], सा सत्या[६३३] ग्रन्थि-भेदिनी[६३४]।।९४।।
परेशी[६३५] परमा - साध्या[६३६], परा - विद्या[६३७] परात्परा[६३८] ।
सुन्दराङ्गी[६३९] सुवर्णाभा[६४०], सुरासुर - नमस्कृता[६४१]।।९५।।
प्रजा[६४२] प्रजा - वती[६४३] धन्या[६४४], धन-धान्य-समृद्धिदा[६४५] ।
ईशानी[६४६] भुवनेशानी[६४७], भवानी[६४८] भुवनेश्वरी[६४९]।।९६।।
अनन्तानन्त - महिता[६५०], जगत् - सारा[६५१] जगद् - भवा[६५२] ।
अचिन्त्यात्माचिन्त्य-शक्ति:[६५३-५४], चिन्त्याचिन्त्य-स्वरूपिणी[६५५-५६]।।९७।।
ज्ञान-गम्या[६५७] ज्ञान-मूर्ति:[६५८], ज्ञानिनी[६५९] ज्ञान-शालिनी[६६०] ।
असिता[६६१] घोर-रूपा[६६२] च, सुधा - धारा[६६३] सुधा - वहा[६६४]।।९८।।
भास्करी[६६५] भास्वरी[६६६] भीतिर्भास्वदक्षानुशायिनी[६६७] ।
अनसूया[६६८] क्षमा[६६९] लज्जा[६७०], दुर्लभाभरणात्मिका[६७१]।।९९।।
विश्वघ्नी[६७२] विश्व-वीरा[६७३] च, विश्वाशा[६७४] विश्व-संस्थिता[६७५] ।
शीलस्था[६७६] शील-रूपा[६७७] च, शीला[६७८] शील-प्रदायिनी[६७९]।।१००।।
बोधनी[६८०] बोध - कुशला[६८१], रोधिनी - बोधिनी[६८२] तथा ।
विद्योतिनी[६८३] विचित्रात्मा[६८४], विद्युत् - पटल - सन्निभा[६८५]।।१०१।।
विश्व-योनि:[६८६] महा-योनि:[६८७], कर्म-योनि:[६८८] प्रियात्मिका[६८९] ।
रोहिणी[६९०] रोग - शमनी[६९१], महा - रोग - ज्वरापहा[६९२]।।१०२।।
रसदा[६९३] पुष्टिदा[६९४] पुष्टि:[६९५], मानदा[६९६] मानव-प्रिया[६९७] ।
कृष्णाङ्ग - वाहिनी[६९८] कृष्णाऽकला[६९९-७००] कृष्ण-सहोदरा[७०१]।।१०३।।
शाम्भवी[७०२] शम्भु-रूपा[७०३] च, शम्भुस्था[७०४] शम्भु-सम्भवा[७०५] ।
विश्वोदरी[७०६] योग-माता[७०७], योग-मुद्रा[७०८] सु-योगिनी[७०९]।।१०४।।
वागीश्वरी[७१०] योग-निद्रा[७११], योगिनी-कोटि-सेविता[७१२] ।
कौलिका[७१३] नन्द-कन्या[७१४] च, शृङ्गार - पीठ - वासिनी[७१५]।।१०५।।

क्षेमङ्करी[७१६] सर्व-रूपा[७१७], दिव्य-रूपा[७१८] दिगम्बरी[७१९] ।
धूम्र-वक्त्रा[७२०] धूम्र-नेत्रा[७२१], धूम्र-केशी[७२२] च धूसरा[७२३]।।१०६।।
पिनाकी[७२४] रुद्र - वेताली[७२५], महा - वेताल - रूपिणी[७२६] ।
तपिनी[७२७] तापिनी[७२८] दीक्षा[७२९], विष्णु - विद्यात्मनाश्रिता[७३०]।।१०७।।
मन्थरा[७३१] जठरा[७३२] तीव्राऽग्नि - जिह्वा[७३३] च भयापहा[७३४] ।
पशुघ्नी[७३५] पशु-पाला[७३६] च, पशुहा[७३७] पशु - वाहिनी[७३८]।।१०८।।
पिता-माता[७३९] च धीरा[७४०] च, पशु-पाश-विनाशिनी[७४१] ।
चन्द्र - प्रभा[७४२] चन्द्र - रेखा[७४३], चन्द्र - कान्ति - विभूषिणी[७४४]।।१०९।।
कुङ्कुमाङ्कित - सर्वाङ्गी[७४५], सुधा[७४६] सद् - गुरु - लोचना[७४७] ।
शुक्लाम्बर - धरा देवी[७४८], वीणा - पुस्तक - धारिणी[७४९]।।११०।।
ऐरावत - पद्म - धरा[७५०], श्वेत - पद्मासन - स्थिता[७५१] ।
रक्ताम्बर - धरा देवी[७५२], रक्त - पद्म - विलोचना[७५३]।।१११।।
दुस्तरा[७५४] तारिणी[७५५] तारा[७५६], तरुणी[७५७] तार-रूपिणी[७५८] ।
सुधा - धारा[७५९] च धर्मज्ञा[७६०], धर्म - संघोपदेशिनी[७६१]।।११२।।
भगेश्वरी[७६२] भगाराध्या[७६३], भगिनी[७६४] भग-नायिका[७६५] ।
भग-बिम्बा[७६६] भग-क्लिन्ना[७६७], भग-योनि:[७६८] भग-प्रदा[७६९]।।११३।।
भगेशी[७७०] भग-रूपा[७७१] च, भग-गुह्या[७७२] भगावहा[७७३]।
भगोदरी[७७४] भगानन्दा[७७५], भगस्था[७७६] भग-शालिनी[७७७] ।।११४।।
सर्व - संक्षोभिणी शक्ति:[७७८], सर्व - विद्राविणी[७७९] तथा।
मालिनी[७८०] माधवी[७८१] माध्वी[७८२], मधु-रूपा[७८३] महोत्कटा[७८४] ।।११५।।
भेरुण्डा[७८५] चन्द्रिका[७८६] ज्योत्स्ना[७८७], विश्व-चक्षुस्तमोपहा[७८८]।
सु - प्रसन्ना[७८९] महा - दूती[७९०], यम - दूती भयङ्करी[७९१] ।।११६।।
उन्मादिनी[७९२] महा - रूपा[७९३], दिव्य - रूपा[७९४] सुरार्चिता[७९५]।
चैतन्य - रूपिणी[७९६] नित्या[७९७], क्लिन्ना काम - मदोद्धता[७९८] ।।११७।।

मदिरानन्द - कैवल्या[७९९], मदिराक्षी[८००] मदालसा[८०१]।
सिद्धेश्वरी[८०२] सिद्ध-विद्या[८०३], सिद्धाद्या[८०४] सिद्ध-सम्भवा[८०५] ।।११८।।
सिद्धर्द्धि:[८०६] सिद्ध-माता[८०७] च, सिद्धि: सर्वार्थ-सिद्धिदा[८०८]।
मनो-मयी[८०९] गुणातीता[८१०], परं ज्योति:- स्वरूपिणी[८११] ।।११९।।
परेशी[८१२] परगापारा[८१३], परा - सिद्धि:[८१४] परा - गति:[८१५]।
विमला[८१६] मोहिनी[८१७] आद्या[८१८], मधु - पान - परायणा[८१९] ।।१२०।।
वेद - वेदाङ्ग - जननी[८२०], सर्व - शास्त्र - विशारदा[८२१]।
सर्व - देव - मयी विद्या[८२२], सर्व - शास्त्र - मयी[८२३] तथा ।।१२१।।
सर्व - ज्ञान - मयी देवी[८२४], सर्व - धर्म - मयीश्वरी[८२५]।
सर्व - यज्ञ - मयी[८२६] यज्ञा[८२७], सर्व - मन्त्राधिकारिणी[८२८] ।।१२२।।
सर्व - सम्पत् - प्रतिष्ठात्री[८२९], सर्व - विद्राविणी परा[८३०]।
सर्व - संक्षोभिणी देवी[८३१], सर्व - मङ्गल - कारिणी[८३२] ।।१२३।।
त्रैलोक्याकर्षिणी देवी[८३३], सर्वाह्लादन - कारिणी[८३४]।
सर्व - सम्मोहिनी देवी[८३५], सर्व - स्तम्भन - कारिणी[८३६]।।१२४।।
त्रैलोक्य - जृम्भिणी देवी[८३७], तथा सर्व - वशङ्करी[८३८]।
त्रैलोक्य - रञ्जिनी देवी[८३९], सर्व - सम्पत्ति - दायिनी[८४०] ।।१२५।।
सर्व - मन्त्र - मयी देवी[८४१], सर्व - द्वन्द्व - क्षयङ्करी[८४२]।
सर्व - सिद्धि - प्रदा देवी[८४३], सर्व - सम्पत् - प्रदायिनी[८४४] ।।१२६।।
सर्व - प्रियङ्करी देवी[८४५], सर्व - मङ्गल - कारिणी[८४६]।
सर्व - काम - प्रदा देवी[८४७], सर्व - दु:ख - विमोचिनी[८४८] ।।१२७।।
सर्व - मृत्यु - प्रशमनी[८४९], सर्व - विघ्न - विनाशिनी[८५०]।
सर्वाङ्ग - सुन्दरी माता[८५१], सर्व - सौभाग्य - दायिनी[८५२] ।।१२८।।
सर्वज्ञा[८५३] सर्व - शक्तिश्च[८५४], सर्वैश्वर्य - फल - प्रदा[८५५]।
सर्व - ज्ञान - मयी देवी[८५६], सर्व - व्याधि - विनाशिनी[८५७] ।।१२९।।

सर्वाधार - स्वरूपा[८५८] च, सर्व - पाप - हरा[८५९] तथा।
सर्वानन्द - मयी देवी[८६०], सर्वेच्छाया: - स्वरूपिणी[८६१] ।।१३०।।
सर्व - लक्ष्मी - मयी विद्या[८६२], सर्वेप्सित - फल - प्रदा[८६३]।
सर्वारिष्ट - प्रशमनी[८६४], परमानन्द - दायिनी[८६५] ।।१३१।।
त्रिकोण-निलया[८६६] त्रिस्था[८६७], त्रिमात्रा[८६८] त्रि-तनु-स्थिता[८६९]।
त्रिवेणी[८७०] त्रिपथा[८७१] - गुण्या[८७२], त्रिमूर्ति:[८७३] त्रिपुरेश्वरी[८७४] ।।१३२।।
त्रिधाम्नी[८७५] त्रिदशाध्यक्षा[८७६] त्रिवित्[८७७] त्रिपुर - वासिनी[८७८]।
त्रयी-विद्या[८७९] च त्रि-शिरा[८८०], त्रैलोक्या[८८१] च त्रिपुष्करा[८८२] ।।१३३।।
त्रिकोटरस्था[८८३] त्रिविधा[८८४], त्रिपुरा[८८५] त्रिपुरात्मिका[८८६]।
त्रिपुरा-श्री[८८७] त्रि-जननी[८८८], त्रिपुरा त्रिपुर-सुन्दरी[८८९] ।।१३४।।
महा-माया[८९०] महा-मेधा[८९१], महा-चक्षु:[८९२] महोक्षजा[८९३] ।
महा-वेधा[८९४] परा-शक्ति:[८९५], परा-प्रज्ञा[८९६] परम्परा[८९७] ।।१३५।।
महा-लक्ष्या[८९८] महा-भक्ष्या[८९९], महा-कक्ष्याऽकलेश्वरी[९००-९०१] ।
कलेश्वरी[९०२] कलानन्दा[९०३], कलेशी[९०४] कल-सुन्दरी[९०५] ।।१३६।।
कलशा[९०६] कलशेशी[९०७] च, कुम्भ-मुद्रा[९०८] कृषोदरी[९०९] ।
कुम्भपा[९१०] कुम्भ-मध्येशी[९११], कुम्भानन्द-प्रदायिनी[९१२] ।।१३७।।
कुम्भजानन्द - नाथा[९१३] च, कुम्भजानन्द - वर्द्धिनी[९१४] ।
कुम्भजानन्द - सन्तोषा[९१५], कुम्भज - तर्पिणी - मुदा[९१६] ।।१३८।।
वृत्ति:[९१७] वृत्तीश्वरीऽमोघा[९१८-९१९], विश्व - वृत्यंत - तर्पिणी[९२०] ।
विश्व-शान्ति:[९२१] विशालाक्षी[९२२], मीनाक्षी[९२३] मीन-वर्णदा[९२४] ।।१३९।।
विश्वाक्षी[९२५] दुर्धरा[९२६] धूमा[९२७], इन्द्राक्षी[९२८] विष्णु-सेविता[९२९] ।
विरंचि-सेविता[९३०] विश्वा[९३१], ईशाना[९३२] ईश-वन्दिता[९३३] ।।१४०।।
महा-शोभा[९३४] महा-लोभा[९३५], महा-मोहा[९३६] महेश्वरी[९३७] ।
महा-भीमा[९३८] महा-क्रोधा[९३९], मन्मथा[९४०] मदनेश्वरी[९४१] ।।१४१।।

महानला[९४२] महाक्रोधा[९४३], विश्व - संहार - ताण्डवा[९४४] ।
सर्व - संहार - वर्णेशी[९४५], सर्व - पालन - तत्परा[९४६] ।।१४२।।
सर्वादिः सृष्टि-कर्त्री[९४७] च, शिवाद्या[९४८] शम्भु-स्वामिनी[९४९] ।
महा-नन्देश्वरी[९५०] मृत्युः[९५१], महा-स्पन्देश्वरी[९५२] सुधा[९५३] ।।१४३।।
पर्णापर्ण[९५४-९५५] परा - वर्णाऽपर्णेशी[९५६-९५७] पर्ण - मानसा[९५८] ।
वराही[९५९] तुण्डदा[९६०] तुण्डा[९६१], गणेशी[९६२] गण-नायिका[९६३] ।।१४४।।
वटुका[९६४] वटुकेशी[९६५] च, क्रौच - दारण - जन्मदा[९६६] ।
क-ए-ई-ल महा-माया[९६७], ह-स-क-ह-ल माययां[९६८] ।।१४५।।
दिव्य-नामा[९६९] सदा-कामा[९७०], श्यामा[९७१] राज्ञा[९७२] रमा[९७३] रसा[९७४] ।
स-क-ल-ह्रीं तत्स्वरूपा[९७५] च, श्रीं ह्रीं नामादि-रूपिणी[९७६] ।।१४६।।
कालज्ञा[९७७] कालहा - मूर्तिः[९७८], सर्व - सौभाग्यदा - मुदा[९७९] ।
उर्वा[९८०] उर्वेश्वरी[९८१] खर्वा[९८२], खर्व-पर्वा[९८३] खगेश्वरी[९८४] ।।१४७।।
गरुडा[९८५] गारुडी - माता[९८६], गरुडेश्वर - पूजिता[९८७] ।
अन्तरिक्षान्तर[९८८] पदा[९८९] , प्रज्ञा[९९०] प्रज्ञानदा-परा[९९१] ।।१४८।।
विज्ञाना[९९२] विश्व - विज्ञाना[९९३], अन्तराक्षा[९९४] विशारदा[९९५] ।
अन्तर्ज्ञान - मयी[९९६] सौम्या[९९७], मोक्षानन्द - विवर्द्धिनी[९९८] ।।१४९।।
शिव - शक्ति - मयी शक्तिः[९९९], एकानन्द - प्रवर्तिनी[१०००] ।
श्रीमाता[१००१] श्रीपरा-विद्या[१००२], सिद्धाश्री[१००३] सिद्ध-सागरा[१००४] ।
सिद्ध-लक्ष्मी[१००५] सिद्ध-विद्या[१००६], सिद्धा[१००७] सिद्धेश्वरी[१००८] सुधा[१००९] ।।१५०।।

।। फल-श्रुति।।

इदं त्रिपुर-सुन्दर्याः, स्तोत्रं नाम - सहस्रकम् ।
गुह्याद्-गुह्य-तरं पुत्र!, तव प्रीत्यै प्रकीर्तितम् ।।१।।
गोपनीयं प्रयत्नेन, पठनीयं प्रयत्नतः ।
नातः पर-तरं पुण्यं, नातः पर-तरं तपः ।।२।।
नातः पर-तरं स्तोत्रं, नातः पर-तरा गतिः।
स्तोत्रं सहस्र-नामाख्यं, मम वक्त्राद् विनिर्गतम् ।।३।।
यः पठेत् प्रयतो भक्त्या, शृणुयाद् वा समाहितः ।
मोक्षार्थी लभते मोक्षं, स्वर्गार्थी स्वर्गमाप्नुयात् ।।४।।

कामांश्च प्राप्नुयात् कामी, धनार्थी च लभेद् धनम् ।
विद्यार्थी लभते विद्यां, यशोऽर्थी लभते यशः ।।५।।
कन्यार्थी लभते कन्या, सुतार्थी लभते सुतम्।
गुर्विणी जनयेत् पुत्रं, कन्या विन्दति सत्-पतिम् ।।६।।
मूर्खोऽपि लभते शास्त्रं, हीनोऽपि लभते गतिम्।
संक्रान्त्यां वार्कामावस्यां, अष्टम्यां च विशेषतः ।।७।।
पौर्णमास्यां चतुर्दश्यां, नवम्यां भौम-वासरे।
पठेद् वा पाठयेद् वापि, शृणुयाद् वा समाहितः ।।८।।
स मुक्तो सर्व-पापेभ्यः , कामेश्वर-समो भवेत्।
लक्ष्मी-वान् धर्मवांश्चैव, वल्लभस्सर्व-योषिताम् ।।९।।
तस्य वश्यं भवेदाशु, त्रैलोक्यं स-चराचरम् ।
रुद्रं दृष्ट्वा यथा देवा, विष्णुं दृष्ट्वा च दानवाः ।।१०।।
यथाहिर्गरुडं दृष्ट्वा, सिंह दृष्टा यथा गजाः।
कीट-वत् प्रपलायन्ते, तस्य वक्त्रावलोकनात् ।।११।।
अग्नि-चौर-भयं तस्य, कदाचिन्नैव सम्भवेत् ।
पातका विविधाः शन्तिर्मेरु-पर्वत-सन्निभाः ।।१२।।
यस्मात् तच्छृणुयाद् विघ्नांस्तृणं वह्नि-हुतं यथा ।
एकदा पठनादेव, सर्व-पाप-क्षयो भवेत् ।।१३।।
दशधा पठनादेव, वाचा-सिद्धिः प्रजायते ।
शतधा पठनाद् वापि, खेचरो जायते नरः ।।१४।।
सहस्र-दश-संख्यातं, यः पठेद् भक्ति-मानसः ।
माताऽस्य जगतां धात्री, प्रत्यक्षा भवति ध्रुवम् ।।१५।।
लक्ष-पूर्णे यथा पुत्र!, स्तोत्र-राजं पठेत् सुधीः ।
भव-पाश-विनिर्मुक्तो, मम तुल्यो न संशयः ।।१६।।
सर्व-तीर्थेषु यत्-पुण्यं, सकृज्जप्त्वा लभेन्नरः ।
सर्व-वेदेषु यत्-प्रोक्तं, तत्-फलं परिकर्त्तितम् ।।१७।।
भूत्वा च बलवान्-पुत्र, धन-वान् सर्व-सम्पदः ।
देहान्ते परमं स्थानं, यत्-सुरैरपि दुर्लभम् ।।१८।।
स यास्यति न सन्देहः, स्तव-राजस्य कीर्त्तनात् ।।१९।।

।। श्रीवामकेश्वर-तन्त्रे षोडश्याः सहस्र-नाम-स्तोत्रं सम्पूर्णम् ।।

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीषोडशी-सहस्र-नामावली-जप-साधना

।। विनियोग ।।

ॐ अस्य श्रीमहा-त्रिपुर-सुन्दरी-सहस्र-नाम-स्तोत्र-मन्त्रस्य श्रीभगवान् दक्षिणा-मूर्तिः ऋषिः। जगतीच्छन्दः। समस्त-प्रकट-गुप्त-सम्प्रदाय-कुल-कौलोत्तीर्ण-निर्गर्भ-रहस्याचिन्त्य-प्रभावती देवता। ॐ वीजं। ह्रीं शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे जपे विनियोगः।

।। ऋष्यादि-न्यास ।।

ॐश्रीमहा-त्रिपुर-सुन्दरी-सहस्र-नाम-स्तोत्र-मन्त्रस्य श्रीभगवान् दक्षिणा-मूर्ति-ऋषये नमः शिरसि। ॐजगतीच्छन्दसे नमः मुखे। ॐसमस्त-प्रकट-गुप्त-सम्प्रदाय-कुल-कौलोत्तीर्ण-निर्गर्भ-रहस्याचिन्त्य-प्रभावती-देवतायै नमः हृदये। ॐॐ-वीजाय नमः नाभौ। ॐह्रीं-शक्तये नमः गुह्ये। ॐक्लीं-कीलकाय नमः पादयोः। ॐधर्मार्थ-काम-मोक्षार्थे जपे विनियोगाय नमः सर्वाङ्गे।

।। ध्यान ।।

ॐ आधारे तरुणार्क-बिम्ब-रुचिरं हेम-प्रभं वाग्भवम्।
बीजं मन्मथमिन्द्र-गोप-सदृशं हृत्-पङ्कजे संस्थितम् ।।
विष्णु-ब्रह्म-पदस्थ-शक्ति-कलितं सोम-प्रभा-भासुरम्।
ये ध्यायन्ति पद-त्रयं तव शिवे! ते यांति सौख्यं पदम् ।।

।। मानस-पूजन ।।

ॐ लं पृथिव्यात्मकं गन्धं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये समर्पयामि नमः।
ॐ हं आकाश-तत्त्वात्मकं पुष्पं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये समर्पयामि नमः।
ॐ यं वायु-तत्त्वात्मकं धूपं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये घ्रापयामि नमः।
ॐ रं अग्नि-तत्त्वात्मकं दीपं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये दर्शयामि नमः।
ॐ वं जल-तत्त्वात्मकं नैवेद्यं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये निवेदयामि नमः।
ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं पर-ब्रह्म-स्वरूपिणी-श्रीषोडशी-देवी-प्रीतये समर्पयामि नमः।

।। नामावली-जप ।।

१ ॐ श्रीकल्याण्यै नमः
२ ॐ श्रीकमलायै नमः
३ ॐ श्रीकाल्यै नमः
४ ॐ श्रीकरालयै नमः

५ ॐ श्रीकाम-रूपिण्यै नमः
६ ॐ श्रीकामाख्यायै नमः
७ ॐ श्रीकामदायै नमः
८ ॐ श्रीकाम्यायै नमः
९ ॐ श्रीकामनायै नमः
१० ॐ श्रीकाम-चारिण्यै नमः
११ ॐ श्रीकाल रात्र्यै नमः
१२ ॐ श्रीमहा-रात्र्यै नमः
१३ ॐ श्रीकपाल्यै नमः
१४ ॐ श्रीकाम-रूपिण्यै नमः
१५ ॐ श्रीकौमार्यै नमः
१६ ॐ श्रीकरुणायै नमः
१७ ॐ श्रीमुक्तिः कलि-कल्मष-नाशिन्यै नमः
१८ ॐ श्रीकात्यायन्यै नमः
१९ ॐ श्रीकराधारायै नमः
२० ॐ श्रीकौमुद्यै नमः
२१ ॐ श्रीकमल-प्रियायै नमः
२२ ॐ श्रीकीर्तिदायै नमः
२३ ॐ श्रीबुद्धिदायै नमः
२४ ॐ श्रीमेधायै नमः
२५ ॐ श्रीनीतिज्ञायै नमः
२६ ॐ श्रीनीति-वत्सलायै नमः
२७ ॐ श्रीमाहेश्वर्यै नमः
२८ ॐ श्रीमहा-मायायै नमः
२९ ॐ श्रीमहा-तेजायै नमः
३० ॐ श्रीमहेश्वर्यै नमः
३१ ॐ श्रीमहा-जिह्वायै नमः
३२ ॐ श्रीमहा-घोरायै नमः
३३ ॐ श्रीमहा-दंष्ट्रायै नमः
३४ ॐ श्रीमहा-भुजायै नमः
३५ ॐ श्रीमहा-मोहान्धकारघ्न्यै नमः
३६ ॐ श्रीमहा-मोक्ष-प्रदायिन्यै नमः
३७ ॐ श्रीमहा-दारिद्र्य-नाशायै नमः
३८ ॐ श्रीमहा-शत्रु-विमर्दिन्यै नमः
३९ ॐ श्रीमहा-मायायै नमः
४० ॐ श्रीमहा-वीर्यायै नमः
४१ ॐ श्रीमहा-पातक-नाशिन्यै नमः
४२ ॐ श्रीमहा-मखायै नमः
४३ ॐ श्रीमन्त्र-मय्यै नमः
४४ ॐ श्रीमणि-पूरक-वासिन्यै नमः
४५ ॐ श्रीमानस्यै नमः
४६ ॐ श्रीमानदायै नमः
४७ ॐ श्रीमान्यायै नमः
४८ ॐ श्रीमनश्चक्षू-रणे-चरायै नमः
४९ ॐ श्रीगण-मात्रे नमः
५० ॐ श्रीगायत्र्यै नमः
५१ ॐ श्रीगण-गन्धर्व-सेवितायै नमः
५२ ॐ श्रीगिरिजायै नमः
५३ ॐ श्रीगिरिशायै नमः
५४ ॐ श्रीसाध्व्यै नमः
५५ ॐ श्रीगिरिस्थायै नमः
५६ ॐ श्रीगिरि-वल्लभायै नमः
५७ ॐ श्रीचण्डेश्वर्यै नमः
५८ ॐ श्रीचण्ड-रूपायै नमः
५९ ॐ श्रीप्रचण्डायै नमः
६० ॐ श्रीचण्ड-मालिन्यै नमः
६१ ॐ श्रीचर्विकायै नमः
६२ ॐ श्रीचर्चिकाकारायै नमः
६३ ॐ श्रीचण्डिकायै नमः
६४ ॐ श्रीचारु-रूपिण्यै नमः

६५ ॐ श्रीयज्ञेश्वर्यै नमः
६६ ॐ श्रीयज्ञ-रूपायै नमः
६७ ॐ श्रीजप-यज्ञ-परायणायै नमः
६८ ॐ श्रीयज्ञ-मात्रे नमः
६९ ॐ श्रीयज्ञ-भोक्त्र्यै नमः
७० ॐ श्रीयज्ञेश्यै नमः
७१ ॐ श्रीयज्ञ-सम्भवायै नमः
७२ ॐ श्रीसिद्ध-यज्ञायै नमः
७३ ॐ श्रीसिद्ध-क्रिया-सिद्धयै नमः
७४ ॐ श्रीसिद्ध-यज्ञाङ्गयै नमः
७५ ॐ श्रीयज्ञ-रक्षिकायै नमः
७६ ॐ श्रीयज्ञ-क्रियायै नमः
७७ ॐ श्रीयज्ञायै नमः
७८ ॐ श्रीयज्ञा-यज्ञ-क्रियालयायै नमः
७९ ॐ श्रीजालन्धर्यै नमः
८० ॐ श्रीजगन्मातायै नमः
८१ ॐ श्रीजात-वेदायै नमः
८२ ॐ श्रीजगत्-प्रियायै नमः
८३ ॐ श्रीजितेन्द्रियायै नमः
८४ ॐ श्रीजित-क्रोधायै नमः
८५ ॐ श्रीजनन्यै नमः
८६ ॐ श्रीजन्म-दायिन्यै नमः
८७ ॐ श्रीगङ्गायै नमः
८८ ॐ श्रीगोदावर्यै नमः
८९ ॐ श्रीगोमत्यै नमः
९० ॐ श्रीशतद्रुकायै नमः
९१ ॐ श्रीघर्घरायै नमः
९२ ॐ श्रीवेद-गर्भायै नमः
९३ ॐ श्रीरेचिकायै नमः
९४ ॐ श्रीसम-वासिन्यै नमः
९५ ॐ श्रीसिन्धवे नमः
९६ ॐ श्रीमन्दाकिन्यै नमः
९७ ॐ श्रीक्षिप्रायै नमः
९८ ॐ श्रीयमुनायै नमः
९९ ॐ श्रीसरस्वत्यै नमः
१०० ॐ श्रीभद्रायै नमः
१०१ ॐ श्रीरागायै नमः
१०२ ॐ श्रीविपाशायै नमः
१०३ ॐ श्रीगण्डक्यै नमः
१०४ ॐ श्रीविन्ध्य-वासिन्यै नमः
१०५ ॐ श्रीनर्मदायै नमः
१०६ ॐ श्रीताप्त्यै नमः
१०७ ॐ श्रीकावेर्यै नमः
१०८ ॐ श्रीवेत्र-वत्यायै नमः
१०९ ॐ श्रीसु-कौशिक्यै नमः
११० ॐ श्रीमहेन्द्र-तनयायै नमः
१११ ॐ श्रीअहल्यायै नमः
११२ ॐ श्रीचर्मकावत्यै नमः
११३ ॐ श्रीअयोध्यायै नमः
११४ ॐ श्रीमथुरायै नमः
११५ ॐ श्रीमायायै नमः
११६ ॐ श्रीकाश्यै नमः
११७ ॐ श्रीकाञ्च्यै नमः
११८ ॐ श्रीअवन्तिकायै नमः
११९ ॐ श्रीपुरे नमः
१२० ॐ श्रीद्वारावत्यै नमः
१२१ ॐ श्रीतीर्थायै नमः
१२२ ॐ श्रीमहा-किल्विष-नाशिन्यै नमः
१२३ ॐ श्रीपद्मिन्यै नमः
१२४ ॐ श्रीपद्म-मध्यस्थायै नमः

१२५ ॐ श्रीपद्म-किञ्जल्क-वासिन्यै नमः
१२६ ॐ श्रीपद्म-वक्त्रायै नमः
१२७ ॐ श्रीचकोराक्ष्यै नमः
१२८ ॐ श्रीपद्मस्थायै नमः
१२९ ॐ श्रीपद्म-सम्भवायै नमः
१३० ॐ श्रीह्रीङ्कार्यै नमः
१३१ ॐ श्रीकुण्डला-धारायै नमः
१३२ ॐ श्रीहृत्-पद्मस्थायै नमः
१३३ ॐ श्रीसु-लोचनायै नमः
१३४ ॐ श्रीश्रीङ्कार्यै नमः
१३५ ॐ श्रीभूषणायै नमः
१३६ ॐ श्रीलक्ष्म्यै नमः
१३७ ॐ श्रीक्लीङ्कार्यै नमः
१३८ ॐ श्रीक्लेश-नाशिन्यै नमः
१३९ ॐ श्रीहरि-वक्त्रोद्भवायै नमः
१४० ॐ श्रीशान्तायै नमः
१४१ ॐ श्रीहरि-वक्त्र-कृतालयायै नमः
१४२ ॐ श्रीहरि-वक्त्रोपमायै नमः
१४३ ॐ श्रीहालायै नमः
१४४ ॐ श्रीहरि-वक्षः-स्थला-स्थितायै नमः
१४५ ॐ श्रीवैष्णव्यै नमः
१४६ ॐ श्रीविष्णु-रूपायै नमः
१४७ ॐ श्रीविष्णु-मातृ-स्वरूपिण्यै नमः
१४८ ॐ श्रीविष्णु-मायायै नमः
१४९ ॐ श्रीविशालाक्ष्यै नमः
१५० ॐ श्रीविशाल-नयनोज्ज्वलायै नमः
१५१ ॐ श्रीविश्वेश्वर्यै नमः
१५२ ॐ श्रीविश्वात्मायै नमः
१५३ ॐ श्रीविश्वेश्यै नमः
१५४ ॐ श्रीविश्व-रूपिण्यै नमः
१५५ ॐ श्रीविश्व-नाथायै नमः
१५६ ॐ श्रीशिवाराध्यायै नमः
१५७ ॐ श्रीशिव-नाथायै नमः
१५८ ॐ श्रीशिव-प्रियायै नमः
१५९ ॐ श्रीशिव-मातायै नमः
१६० ॐ श्रीशिवाख्यायै नमः
१६१ ॐ श्रीशिवदायै नमः
१६२ ॐ श्रीशिव-रूपिण्यै नमः
१६३ ॐ श्रीभवेश्वर्यै नमः
१६४ ॐ श्रीभवाराध्यायै नमः
१६५ ॐ श्रीभवेश्यै नमः
१६६ ॐ श्रीभव-नायिकायै नमः
१६७ ॐ श्रीभव-मातायै नमः
१६८ ॐ श्रीभव-गम्यायै नमः
१६९ ॐ श्रीभव-कण्टक-नाशिन्यै नमः
१७० ॐ श्रीभव-प्रियायै नमः
१७१ ॐ श्रीभवानन्दायै नमः
१७२ ॐ श्रीभवान्यै नमः
१७३ ॐ श्रीभव-मोहिन्यै नमः
१७४ ॐ श्रीगायत्र्यै नमः
१७५ ॐ श्रीसावित्र्यै नमः
१७६ ॐ श्रीब्रह्माण्यै नमः
१७७ ॐ श्रीब्रह्म-रूपिण्यै नमः
१७८ ॐ श्रीब्रह्मेश्यै नमः
१७९ ॐ श्रीब्रह्मदायै नमः
१८० ॐ श्रीब्रह्मायै नमः
१८१ ॐ श्रीब्रह्माण्यै नमः
१८२ ॐ श्रीब्रह्म-वादिन्यै नमः
१८३ ॐ श्रीदुर्गस्थायै नमः
१८४ ॐ श्रीदुर्ग-रूपायै नमः

१८५ ॐ श्रीदुर्गायै नमः
१८६ ॐ श्रीदुर्गार्ति-नाशिन्यै नमः
१८७ ॐ श्रीसुगमायै नमः
१८८ ॐ श्रीदुर्गमायै नमः
१८९ ॐ श्रीदान्तायै नमः
१९० ॐ श्रीदयायै नमः
१९१ ॐ श्रीदोग्ध्र्यै नमः
१९२ ॐ श्रीदुरापहायै नमः
१९३ ॐ श्रीदुरितघ्न्यै नमः
१९४ ॐ श्रीदुराध्यक्षायै नमः
१९५ ॐ श्रीदुरायै नमः
१९६ ॐ श्रीदुष्कृत-नाशिन्यै नमः
१९७ ॐ श्रीपञ्चास्यायै नमः
१९८ ॐ श्रीपञ्चम्यै नमः
१९९ ॐ श्रीपूर्णायै नमः
२०० ॐ श्रीपूर्ण-पीठ-निवासिन्यै नमः
२०१ ॐ श्रीसत्त्वस्थायै नमः
२०२ ॐ श्रीसत्त्व-रूपायै नमः
२०३ ॐ श्रीसत्त्वगायै नमः
२०४ ॐ श्रीसत्त्व-सम्भवायै नमः
२०५ ॐ श्रीरजस्थायै नमः
२०६ ॐ श्रीरजो-रूपायै नमः
२०७ ॐ श्रीरजो-गुण-समुद्भवायै नमः
२०८ ॐ श्रीतमस्थायै नमः
२०९ ॐ श्रीतमो-रूपायै नमः
२१० ॐ श्रीतामस्यै नमः
२११ ॐ श्रीतामस-प्रियायै नमः
२१२ ॐ श्रीतमो-गुण-समुद्भूतायै नमः
२१३ ॐ श्रीसात्विक्यै नमः
२१४ ॐ श्रीराजस्यै नमः
२१५ ॐ श्रीकलायै नमः
२१६ ॐ श्रीकाष्ठायै नमः
२१७ ॐ श्रीमुहूर्तायै नमः
२१८ ॐ श्रीनिमिषायै नमः
२१९ ॐ श्रीअनिमेषायै नमः
२२० ॐ श्रीअर्द्ध-मासायै नमः
२२१ ॐ श्रीमासायै नमः
२२२ ॐ श्रीसंवत्सर-स्वरूपिण्यै नमः
२२३ ॐ श्रीयोगस्थायै नमः
२२४ ॐ श्रीयोग-रूपायै नमः
२२५ ॐ श्रीकल्पस्थायै नमः
२२६ ॐ श्रीकल्प-रूपिण्यै नमः
२२७ ॐ श्रीनाना-रत्न-विचित्राङ्ग्यै नमः
२२८ ॐ श्रीनानाऽऽभरण-मण्डितायै नमः
२२९ ॐ श्रीविश्वात्मिकायै नमः
२३० ॐ श्रीविश्व-मात्रे नमः
२३१ ॐ श्रीविश्व-पाश-विनाशिन्यै नमः
२३२ ॐ श्रीविश्वास-कारिण्यै नमः
२३३ ॐ श्रीविश्वायै नमः
२३४ ॐ श्रीविश्व-शक्ति-विचारणायै नमः
२३५ ॐ श्रीजपा-कुसुम-सङ्काशायै नमः
२३६ ॐ श्रीदाडिमी-कुसुमोपमायै नमः
२३७ ॐ श्रीचतुरङ्ग्यै नमः
२३८ ॐ श्रीचतुर्बाहु-वासिन्यै नमः
२३९ ॐ श्रीचतुराचार-वासिन्यै नमः
२४० ॐ श्रीसर्वेश्यै नमः
२४१ ॐ श्रीसर्वदायै नमः
२४२ ॐ श्रीसर्वायै नमः
२४३ ॐ श्रीसर्वदा-सर्व-दायिन्यै नमः
२४४ ॐ श्रीमाहेश्वर्यै नमः

२४५ ॐ श्रीसर्वाद्यायै नमः
२४६ ॐ श्रीशर्वाण्यै नमः
२४७ ॐ श्रीसर्व - मङ्गलायै नमः
२४८ ॐ श्रीनलिन्यै नमः
२४९ ॐ श्रीनन्दिन्यै नमः
२५० ॐ श्रीनन्दायै नमः
२५१ ॐ श्रीआनन्दायै नमः
२५२ ॐ श्रीआनन्द-वर्द्धिन्यै नमः
२५३ ॐ श्रीव्यापिनी सर्व-भूतवे नमः
२५४ ॐ श्रीभव-भार-विनाशिन्यै नमः
२५५ ॐ श्रीसर्व-शृङ्गार-वेषाढ्यायै नमः
२५६ ॐ श्रीपाशांकुश-करोद्यतायै नमः
२५७ ॐ श्रीसूर्य-कोटि-सहस्राभायै नमः
२५८ ॐ श्रीचन्द्र-कोटि-निभाननायै नमः
२५९ ॐ श्रीगणेश-कोटि-लावण्यायै नमः
२६० ॐ श्रीविष्णु-कोट्यरि-मर्दिन्यै नमः
२६१ ॐ श्रीदावाग्नि-कोटि-दलिन्यै नमः
२६२ ॐ श्रीरुद्र-कोट्युग्र-रूपिण्यै नमः
२६३ ॐ श्रीसमुद्र-कोटि-गम्भीरायै नमः
२६४ ॐ श्रीवायु-कोटि-महा-बलायै नमः
२६५ ॐ श्रीआकाश-कोटि-विस्तारायै नमः
२६६ ॐ श्रीयम-कोटि-भयङ्कर्यै नमः
२६७ ॐ श्रीमेरु-कोटि-समुच्छ्रायायै नमः
२६८ ॐ श्रीगण-कोटि-समृद्धिदायै नमः
२६९ ॐ श्रीनिष्कस्तोकायै नमः
२७० ॐ श्रीनिराधारायै नमः
२७१ ॐ श्रीनिर्गुणायै नमः
२७२ ॐ श्रीगुण-वर्जितायै नमः
२७३ ॐ श्रीअशोकायै नमः
२७४ ॐ श्रीशोक-रहितायै नमः
२७५ ॐ श्रीताप-त्रय-विवर्जितायै नमः
२७६ ॐ श्रीवसिष्ठायै नमः
२७७ ॐ श्रीविश्व-जनन्यै नमः
२७८ ॐ श्रीविश्वाख्यायै नमः
२७९ ॐ श्रीविश्व-वर्द्धिन्यै नमः
२८० ॐ श्रीचित्रायै नमः
२८१ ॐ श्रीविचित्र-चित्राङ्ग्यै नमः
२८२ ॐ श्रीहेतु-गर्भायै नमः
२८३ ॐ श्रीकुलेश्वर्यै नमः
२८४ ॐ श्रीइच्छा-शक्त्यै नमः
२८५ ॐ श्रीज्ञान-शक्त्यै नमः
२८६ ॐ श्रीक्रिया-शक्त्यै नमः
२८७ ॐ श्रीशुचि-स्मितायै नमः
२८८ ॐ श्रीशुच्यै नमः
२८९ ॐ श्रीस्मृति-मय्यै नमः
२९० ॐ श्रीसत्यायै नमः
२९१ ॐ श्रीश्रुति-रूपायै नमः
२९२ ॐ श्रीश्रुति-प्रियायै नमः
२९३ ॐ श्रीमहा-सत्त्व-मय्यै नमः
२९४ ॐ श्रीसत्त्वायै नमः
२९५ ॐ श्रीपञ्च-तत्त्वोपरि-स्थितायै नमः
२९६ ॐ श्रीपार्वत्यै नमः
२९७ ॐ श्रीहिमवत्-पुत्र्यै नमः
२९८ ॐ श्रीपारस्थायै नमः
२९९ ॐ श्रीपार-रूपिण्यै नमः
३०० ॐ श्रीजयन्त्यै नमः
३०१ ॐ श्रीभद्र-काल्यै नमः
३०२ ॐ श्रीअहल्यायै नमः
३०३ ॐ श्रीकुल-नायिकायै नमः
३०४ ॐ श्रीभूत-धात्र्यै नमः

३०५ ॐ श्रीभूतेश्यै नमः
३०६ ॐ श्रीभूतस्थायै नमः
३०७ ॐ श्रीभूत-भाविन्यै नमः
३०८ ॐ श्रीमहा-कुण्डलिनी-शक्त्यै नमः
३०९ ॐ श्रीमहा-विभव-वर्द्धिन्यै नमः
३१० ॐ श्रीहंसाक्ष्यै नमः
३११ ॐ श्रीहंस-रूपायै नमः
३१२ ॐ श्रीहंसस्थायै नमः
३१३ ॐ श्रीहंस-रूपिण्यै नमः
३१४ ॐ श्रीसोमाग्नि-मध्यस्थायै नमः
३१५ ॐ श्रीसूर्याग्नि-मध्यस्थायै नमः
३१६ ॐ श्रीमणि-मण्डल-वासिन्यै नमः
३१७ ॐ श्रीद्वादशार-सरोजस्थायै नमः
३१८ ॐ श्रीसूर्य-मण्डल-वासिन्यै नमः
३१९ ॐ श्रीअकलङ्कायै नमः
३२० ॐ श्रीशशाङ्काभायै नमः
३२१ ॐ श्रीषोडशार-निवासिन्यै नमः
३२२ ॐ श्रीडाकिन्यै नमः
३२३ ॐ श्रीराकिन्यै नमः
३२४ ॐ श्रीलाकिन्यै नमः
३२५ ॐ श्रीकाकिन्यै नमः
३२६ ॐ श्रीशाकिन्यै नमः
३२७ ॐ श्रीहाकिनीषट्-चक्रेषु-निवासिन्यै नमः
३२८ ॐ श्रीसृष्टि-स्थिति-विनाशिन्यै नमः
३२९ ॐ श्रीसृष्ट्यन्तायै नमः
३३० ॐ श्रीसृष्टि-कारिण्यै नमः
३३१ ॐ श्रीश्री-कण्ठ-प्रियायै नमः
३३२ ॐ श्रीहृत्कण्ठायै नमः
३३३ ॐ श्रीनन्दाख्यायै नमः
३३४ ॐ श्रीविन्दु-मालिन्यै नमः
३३५ ॐ श्रीचतुष्षटि-कलाधारायै नमः
३३६ ॐ श्रीदेह-दण्ड-समाश्रितायै नमः
३३७ ॐ श्रीमायायै नमः
३३८ ॐ श्रीकाल्यै नमः
३३९ ॐ श्रीधृत्यै नमः
३४० ॐ श्रीमेधायै नमः
३४१ ॐ श्रीक्षुधायै नमः
३४२ ॐ श्रीतुष्ट्यै नमः
३४३ ॐ श्रीमहा-द्युत्यै नमः
३४४ ॐ श्रीहिंगुलायै नमः
३४५ ॐ श्रीमङ्गलायै नमः
३४६ ॐ श्रीसीतायै नमः
३४७ ॐ श्रीसुषुम्ना-मध्य-गामिन्यै नमः
३४८ ॐ श्रीपर-घोरायै नमः
३४९ ॐ श्रीकरालाक्ष्यै नमः
३५० ॐ श्रीविजयायै नमः
३५१ ॐ श्रीजय-दायिन्यै नमः
३५२ ॐ श्रीहृत्-पद्म-निलयायै नमः
३५३ ॐ श्रीभीमायै नमः
३५४ ॐ श्रीमहा-भैरव-नादिन्यै नमः
३५५ ॐ श्रीआकाश-लिङ्ग-सम्भूतायै नमः
३५६ ॐ श्रीभुवनोद्यान-वासिन्यै नमः
३५७ ॐ श्रीमहत्-सूक्ष्मायै नमः
३५८ ॐ श्रीकङ्कालयै नमः
३५९ ॐ श्रीभीम-रूपायै नमः
३६० ॐ श्रीमहा-बलायै नमः
३६१ ॐ श्रीमेनका-गर्भ-सम्भूतायै नमः
३६२ ॐ श्रीतप्त-काञ्चन-सन्निभायै नमः
३६३ ॐ श्रीअन्तरस्थायै नमः
३६४ ॐ श्रीकूट-बीजायै नमः

३६५ ॐ श्रीत्रिकूटाचल-वासिन्यै नमः
३६६ ॐ श्रीवर्णाख्यायै नमः
३६७ ॐ श्रीवर्ण-रहितायै नमः
३६८ ॐ श्रीपञ्चाशद्वर्ण-भेदिन्यै नमः
३६९ ॐ श्रीविद्याधर्यै नमः
३७० ॐ श्रीलोक-धात्र्यै नमः
३७१ ॐ श्रीअप्सरायै नमः
३७२ ॐ श्रीअप्सरः-प्रियायै नमः
३७३ ॐ श्रीदीक्षायै नमः
३७४ ॐ श्रीदाक्षायण्यै नमः
३७५ ॐ श्रीदक्षायै नमः
३७६ ॐ श्रीदक्ष-यज्ञ-विनाशिन्यै नमः
३७७ ॐ श्रीयशः-पूर्णायै नमः
३७८ ॐ श्रीयशोदायै नमः
३७९ ॐ श्रीयशोदा-गर्भ-सम्भवायै नमः
३८० ॐ श्रीदेवक्यै नमः
३८१ ॐ श्रीदेव-मात्रे नमः
३८२ ॐ श्रीराधिका कृष्ण-वल्लभायै नमः
३८३ ॐ श्रीअरुन्धत्यै नमः
३८४ ॐ श्रीशच्यै नमः
३८५ ॐ श्रीइन्द्राण्यै नमः
३८६ ॐ श्रीगान्धार्यै नमः
३८७ ॐ श्रीगन्ध-मालिन्यै नमः
३८८ ॐ श्रीध्यानातीतायै नमः
३८९ ॐ श्रीध्यान-गम्यायै नमः
३९० ॐ श्रीध्यानज्ञायै नमः
३९१ ॐ श्रीध्यान-धारिण्यै नमः
३९२ ॐ श्रीलम्बोदर्यै नमः
३९३ ॐ श्रीलम्बोष्ठ्यै नमः
३९४ ॐ श्रीजाम्बवन्त्यै नमः
३९५ ॐ श्रीजलोदर्यै नमः
३९६ ॐ श्रीमहोदर्यै नमः
३९७ ॐ श्रीमुक्त-केश्यै नमः
३९८ ॐ श्रीमुक्त-कामार्थ-सिद्धिदायै नमः
३९९ ॐ श्रीतपस्विन्यै नमः
४०० ॐ श्रीतपो-निष्ठायै नमः
४०१ ॐ श्रीसुपर्णायै नमः
४०२ ॐ श्रीधर्म-वासिन्यै नमः
४०३ ॐ श्रीबाण-चाप-धरायै नमः
४०४ ॐ श्रीधीरायै नमः
४०५ ॐ श्रीपाञ्चाल्यै नमः
४०६ ॐ श्रीपञ्चम-प्रियायै नमः
४०७ ॐ श्रीगुह्याङ्ग्यै नमः
४०८ ॐ श्रीसु-भीमाङ्ग्यै नमः
४०९ ॐ श्रीगुह्य-तत्त्वायै नमः
४१० ॐ श्रीनिरञ्जनायै नमः
४११ ॐ श्रीअशरीरायै नमः
४१२ ॐ श्रीशरीरस्थायै नमः
४१३ ॐ श्रीसंसारार्णव-तारिण्यै नमः
४१४ ॐ श्रीअमृतायै नमः
४१५ ॐ श्रीनिष्कलायै नमः
४१६ ॐ श्रीभद्रायै नमः
४१७ ॐ श्रीसकलायै नमः
४१८ ॐ श्रीकृष्ण-पिङ्गलायै नमः
४१९ ॐ श्रीचक्र-प्रियायै नमः
४२० ॐ श्रीचक्राह्वायै नमः
४२१ ॐ श्रीपञ्च-चक्रादि-दारिण्यै नमः
४२२ ॐ श्रीपद्म-राग-प्रतीकाशायै नमः
४२३ ॐ श्रीनिर्मलाकाश-सन्निभायै नमः
४२४ ॐ श्रीअधःस्थायै नमः

४२५ ॐ श्रीऊर्ध्व-रूपायै नमः
४२६ ॐ श्रीऊर्ध्व-पद्म-निवासिन्यै नमः
४२७ ॐ श्रीकार्य-कारण-कर्तृत्वे, शश्वद्-रूपेषु-संस्थितायै नमः
४२८ ॐ श्रीरसज्ञायै नमः
४२९ ॐ श्रीरस-मध्यस्थायै नमः
४३० ॐ श्रीगन्धस्थायै नमः
४३१ ॐ श्रीगन्ध-रूपिण्यै नमः
४३२ ॐ श्रीपर-ब्रह्म-स्वरूपायै नमः
४३३ ॐ श्रीपर-ब्रह्म-निवासिन्यै नमः
४३४ ॐ श्रीशब्द-ब्रह्म-स्वरूपायै नमः
४३५ ॐ श्रीशब्दस्थायै नमः
४३६ ॐ श्रीशब्द-वर्जितायै नमः
४३७ ॐ श्रीसिद्धयै नमः
४३८ ॐ श्रीबुद्धयै नमः
४३९ ॐ श्रीपरा-बुद्धयै नमः
४४० ॐ श्रीसन्दीप्तिर्मध्य-संस्थितायै नमः
४४१ ॐ श्रीस्व-गुह्यायै नमः
४४२ ॐ श्रीशाम्भवी-शक्त्यै नमः
४४३ ॐ श्रीतत्त्वस्थायै नमः
४४४ ॐ श्रीतत्त्व-रूपिण्यै नमः
४४५ ॐ श्रीशाश्वत्यै नमः
४४६ ॐ श्रीभूत-मात्रे नमः
४४७ ॐ श्रीमहा-भूताधिप-प्रियायै नमः
४४८ ॐ श्रीशुचि-प्रेतायै नमः
४४९ ॐ श्रीधर्म-सिद्धयै नमः
४५० ॐ श्रीधर्म-वृद्धयै नमः
४५१ ॐ श्रीपराजितायै नमः
४५२ ॐ श्रीकाम-सन्दीपिन्यै नमः
४५३ ॐ श्रीकामायै नमः
४५४ ॐ श्रीसदा कौतूहल-प्रियायै नमः
४५५ ॐ श्रीजटा-जूट-धरायै नमः
४५६ ॐ श्रीमुक्तायै नमः
४५७ ॐ श्रीसूक्ष्मायै नमः
४५८ ॐ श्रीशक्ति-विभूषणायै नमः
४५९ ॐ श्रीद्वीपि-चर्म-परीधानायै नमः
४६० ॐ श्रीचीर-वल्कल-धारिण्यै नमः
४६१ ॐ श्रीत्रिशूल-डमरु-धरायै नमः
४६२ ॐ श्रीनर-माला-विभूषणायै नमः
४६३ ॐ श्रीअत्युग्र-रूपिण्यै नमः
४६४ ॐ श्रीउग्रायै नमः
४६५ ॐ श्रीकल्पान्त-दहनोपमायै नमः
४६६ ॐ श्रीत्रैलोक्य-साधिन्यै नमः
४६७ ॐ श्रीसाध्यायै नमः
४६८ ॐ श्रीसिद्धयै नमः
४६९ ॐ श्रीसाधक-वत्सलायै नमः
४७० ॐ श्रीसर्व-विद्या-मय्यै नमः
४७१ ॐ श्रीसारायै नमः
४७२ ॐ श्रीअसुराणां विनाशिन्यै नमः
४७३ ॐ श्रीदमन्यै नमः
४७४ ॐ श्रीदामिन्यै नमः
४७५ ॐ श्रीदान्तायै नमः
४७६ ॐ श्रीदयायै नमः
४७७ ॐ श्रीदोग्ध्र्यै नमः
४७८ ॐ श्रीदुरापहायै नमः
४७९ ॐ श्रीअग्नि-जिह्वोपमायै नमः
४८० ॐ श्रीघोराघोर-घोर-तराननायै नमः
४८१ ॐ श्रीनारायण्यै नमः
४८२ ॐ श्रीनारसिंह्यै नमः
४८३ ॐ श्रीनृसिंह-हृदये-स्थितायै नमः

४८४ ॐ श्रीयोगेश्वर्यै नमः
४८५ ॐ श्रीयोग-रूपायै नमः
४८६ ॐ श्रीयोग-मात्रे नमः
४८७ ॐ श्रीयोगिन्यै नमः
४८८ ॐ श्रीखेचर्यै नमः
४८९ ॐ श्रीखचर्यै नमः
४९० ॐ श्रीखेलायै नमः
४९१ ॐ श्रीनिर्वाण-पद-संश्रयायै नमः
४९२ ॐ श्रीनागिन्यै नमः
४९३ ॐ श्रीनाग-कन्यायै नमः
४९४ ॐ श्रीसुवेशायै नमः
४९५ ॐ श्रीनाग-नायिकायै नमः
४९६ ॐ श्रीविष-ज्वालावत्यै नमः
४९७ ॐ श्रीदीप्तायै नमः
४९८ ॐ श्रीकला-शत-विभूषणायै नमः
४९९ ॐ श्रीतीव्र-वक्त्रायै नमः
५०० ॐ श्रीमहा-वक्त्रायै नमः
५०१ ॐ श्रीनाग-कोटित्व-धारिण्यै नमः
५०२ ॐ श्रीमहा-सत्त्वायै नमः
५०३ ॐ श्रीधर्मज्ञायै नमः
५०४ ॐ श्रीधर्माति-सुख-दायिन्यै नमः
५०५ ॐ श्रीकृष्ण-मूर्द्धायै नमः
५०६ ॐ श्रीमहा-मूर्द्धायै नमः
५०७ ॐ श्रीघोर-मूर्द्धायै नमः
५०८ ॐ श्रीवराननायै नमः
५०९ ॐ श्रीसर्वेन्द्रिय-मनोन्मत्तायै नमः
५१० ॐ श्रीसर्वेन्द्रिय-मनो-मय्यै नमः
५११ ॐ श्रीसर्व-संग्राम-जयदायै नमः
५१२ ॐ श्रीसर्व-प्रहरणोद्यतायै नमः
५१३ ॐ श्रीसर्व-पीडोप-शमन्यै नमः
५१४ ॐ श्रीसर्वारिष्ट-निवारिण्यै नमः
५१५ ॐ श्रीसर्वैश्वर्य-समुत्पन्नायै नमः
५१६ ॐ श्रीसर्व-ग्रह-विनाशिन्यै नमः
५१७ ॐ श्रीमातङ्ग्यै नमः
५१८ ॐ श्रीमत्त-मातङ्ग्यै नमः
५१९ ॐ श्रीमातङ्गी-प्रिय-मण्डलायै नमः
५२० ॐ श्रीअमृतोदधि-मध्यस्थायै नमः
५२१ ॐ श्रीकटि-सूत्रैरलंकृतायै नमः
५२२ ॐ श्रीप्रवाल-वसनाम्बुजायै नमः
५२३ ॐ श्रीमणि-मण्डल-मध्यस्थायै नमः
५२४ ॐ श्रीईषत्-प्रहसिताननायै नमः
५२५ ॐ श्रीकुमुदायै नमः
५२६ ॐ श्रीललितायै नमः
५२७ ॐ श्रीलोलायै नमः
५२८ ॐ श्रीलाक्षा-लोहित-लोचनायै नमः
५२९ ॐ श्रीदिग्वासायै नमः
५३० ॐ श्रीदेवदूत्यै नमः
५३१ ॐ श्रीदेव-देवाधि-देवतायै नमः
५३२ ॐ श्रीसिंहोपरि-समारूढायै नमः
५३३ ॐ श्रीहिमाचल-निवासिन्यै नमः
५३४ ॐ श्रीअट्टाट्ट-हासिन्यै नमः
५३५ ॐ श्रीघोरायै नमः
५३६ ॐ श्रीघोर-दैत्य-विनाशिन्यै नमः
कुल-पथ-भेद से पृथ्वी से मन-पर्यन्त २१ तत्त्वों का भेद होता है। २१ तत्त्व– १. पृथ्वी, २. अप्, ३. अग्नि, ४. वायु, ५. आकाश, ६. गन्ध, ७. रस, ८. रूप, ९. स्पर्श, १०. शब्द, ११. नासिका, १२. जिह्वा, १३. चक्षु, १४. त्वक्, १५. श्रोत्र, १६. वाक्, १७. पाणि, १८. पाद, १९. पायु, २०. उपस्थ, २१. मन।

'मन' से परे निम्न-लिखित तत्त्व हैं–२२ बुद्धि, २३ अहङ्कार, २४ प्रकृति, २५ पुरुष (चित्त), २६ कला, २७ अविद्या, २८ विद्या, २९ राग, ३० नियति, ३१ माया, ३२ शिव, ३३. शक्ति।

कोई-कोई १५ तत्त्व पृथक् बताते हैं। यथा–

सप्त-धातु–१. त्वक्, २. असृक, ३. मांस, ४. मेद, ५. अस्थि, ६. मज्जा और ७. शुक्र।

पञ्च-प्राण–१. प्राण, २. अपान, ३. व्यान, ४. उदान और ५. समान।

गुण-त्रय–१. सत्त्व, २. रज और ३. तम।

## 'श्री-चक्र' में कोण तथा ३६० रश्मि-कलाएँ

प्रस्तुत 'सुभगोदय-स्तुति' के १०-११ और १७ वें पद्यों में श्री-चक्र के रचना-विधान एवं शिव-शक्त्यात्मकता का वर्णन है। सौन्दर्य-लहरी में भी 'चतुभिः श्रीकण्ठैः०' इत्यादि ११ वें पद्य में श्री-चक्र के सम्बन्ध में कहा गया है। तदनुसार श्री-चक्र में नौ त्रिकोणों में चार शिवात्मक तथा पाँच शक्त्यात्मक हैं। ये सब शम्भु-शक्ति (बिन्दु) से पृथक् हैं। फिर अष्ट-दल-पद्म तथा षोडश-दल-पद्म हैं पश्चात् त्रि-वृत्त और त्रि-भूपुर हैं।

श्रीगौडपाद ने प्रस्तुत 'सुभगोदय' स्तुति में 'त्रिखण्डं ते चक्रं०' और 'शतं चाष्टौ वह्नेः०' इत्यादि आठवें तथा नौवें पद्यों से जिन ३६० रश्मियों का वर्णन किया है, उन्हें आचार्य शङ्कर ने भी 'सौन्दर्य-लहरी' में 'क्षितौ षट्-पञ्चाशत्०' इत्यादि १४ वें पद्य से प्रस्फुट किया है। श्रीबाबा जी ने इस प्रसङ्ग को 'सार्थ सौन्दर्य-लहरी' में इस प्रकार समझाया है–

हे माँ, हे सर्व-सिद्धि-मयि! आप-श्री के चरण-कमल पञ्च-तत्त्वात्मक केन्द्र-बिन्दु-महाकाश से परम-पर हैं। केन्द्र-बिन्दु ३६० कला का होता है। उसमें ५६ भवात्मक मयूखाएँ पृथ्वी की, ५२ जलात्मक उदधि की, ६२ अग्न्यात्मक वह्नि की, ५४ अनिलात्मक वायु की, ६२ आकाशात्मक शून्य (व्योम) की और ६४ मयूखाएँ मन की हैं। पञ्च-तत्त्वात्मक देह की सब मिलाकर २९६ कलाएँ होती हैं और मन की ६४ कलाएँ। इस प्रकार कुल ३६० कलाएँ (मयूखाएँ) होती हैं। इन सम्पूर्ण जीवनात्मक तथा सृष्ट्यात्मक विश्व-शक्ति-कलाओं से भगवती के चरण-कमल अत्यन्त परे हैं।

१. उत्पत्ति, २. स्थिति, ३. लय–ये त्रि-क्रियाएँ 'सृष्टि-क्रम' कहलाती हैं। इन तीन क्रियाओं में त्रि-गुण तथा त्रि-दैवत हैं। १. रज, २. सत् और ३. तम– ये तीन गुण है तथा १. ब्रह्मा, २. विष्णु और ३. रुद्र–त्रि-देव हैं।

यहाँ योगिराज बाबाश्री ने और भी विशेष-रूप से समझाया है, देखिए 'सार्थ सौन्दर्य-लहरी'।

'सुभगोदय-स्तुति' में 'ऐक्य-निरूपण तथा मन्त्र-चक्रैक्य' को भी बहुत महत्त्व दिया गया है। यहाँ ऐक्य-चतुर्धा और षोढा बतलाया गया है। इस ऐक्य-साधना में रहस्यात्मक पद्धति का समावेश है, जो गुरु-कृपा से ही संवेद्य है। आगमों तथा साधकों के स्वानुभव में ही ऐसे ऐक्य के निर्देश प्राप्त होते हैं। इस ऐक्य में कहीं कुण्डलिनी-रहस्य-सोपान की 'उन्नेय-भूमिका' अपेक्षित होती है, तो कहीं 'प्रत्यावृत्ति-भूमिका' की आवश्यकता होती है। आचार्य श्री ने यहाँ सहस्त्रार-पद्म में कुण्डलिनी को पहुँचाने तथा वहाँ विराजमान होने की स्थिति में अवतरण की प्रक्रिया को भी दिखलाया है। संक्षेप में मन्त्र और चक्र का यह ऐक्य भी योगाभ्यास द्वारा साध्य ध्यान-मूलक-साधना के रहस्य को व्यक्त करता है।

अग्नि-शिव-शशि-मयी त्रि-देव-माता अर्थात् काम-कला का ध्यान, तीव्र विद्युद् रेखा-वत् द्रुत-गति-मयी तथा अनन्ताकाश-मयी माता के अनन्त शक्ति-सागर में बिन्दु-वत् चन्द्राग्नि-सूर्य की सत्ता एवं प्रकृति चक्र के षट्-चक्र-पद्मों से अति परे सहस्त्रार-पद्म में दिव्य-दर्शन के भाव भी इन स्तुतियों में संवलित हैं।

आचार्य श्रीगौडपाद ने–'षडब्जारण्ये त्वां समयिन इमे पञ्चक-समां०' इस पद्य से जिसका निर्देश किया है, उसका पल्लवन श्रीशङ्कराचार्य ने इस पद्य से किया है– 'तडिल्लेखातन्वीं-तपन-शशि-वैश्वानर-मयीं'०।

'सुभगोदय' में परम-गुरु श्रीगौडपादाचार्य जी ने भगवती के स्वरूप के वर्णन में केवल तीन पद्य ही लिखे हैं, जिसमें चतुर्भुजा और दश-भुजा कह कर, उनमें धारण किए हुए आयुधों का ही सङ्केत अधिक है। यथा–'धनुर्बाणानिक्षूद्भव-कुसुमजानकुंश-वरं०'

ठीक इसी परम्परा में आचार्य श्री शङ्कर द्वारा रचित 'सौन्दर्य-लहरी' में भगवती के समस्त शरीर और अङ्गों के सौष्ठव का कमनीय वर्णन हुआ है।

–डॉ० रुद्रदेव त्रिपाठी

★★★

श्रीमद्-आद्य-शङ्कराचार्याणां परम गुरुवर
परम पूज्य श्रीगौडपादाचार्य-विरचिता

# श्रीसुभगोदय-स्तुति

भवानि! त्वां वन्दे भव-महिषि सच्चित्-सुख-वपुः,
पराकारां देवीममृत-लहरीमैन्दव - कलाम् ।
महा-कालातीतां कलित-सरणी-कल्पित-तनुम्,
सुधा-सिन्धोरन्तर्वसतिमनिशं वासर-मयीम् ।।१।।
मनस्तत्त्वं जित्वा नयनमथ नासाग्र-घटितम्,
पुनर्व्यावृत्ताक्षः स्वयमपि यदा पश्यति पराम् ।
तदानीमेवास्य स्फुरति बहिरन्तर्भगवती,
परानन्दाकारा पर-शिव-परा काचिदपरा ।।२।।
मनो-मार्गं जित्वा मरुत इह नाडी-गण-जुषो,
निरुद्ध्यार्कं सेन्दुं दहनमपि सञ्ज्वाल्य शिखया।
सुषुम्णां संयोज्य श्लथयति च षड्-ग्रन्थि-शशिनम्,
तवाज्ञा-चक्रस्थं विलयति महा-योगि-समयी ।।३।।
यदा तौ चन्द्रार्कौ निज-सदन-संरोधन-वशा-
दशक्तौ पीयूष-स्त्रवण-हरणे सा च भुजगी।
प्रबुद्धा क्षुत्-क्रुद्धा दशति शशिनं बैन्दव-गतम्,
सुधा-धारा-सारैः स्नपयसि तनुं बैन्दव-कले ।।४।।
पृथिव्यापस्तेजः पवन - गगने तत् - प्रकृतयः,
स्थितास्तन्मात्रास्ता विषय-दशकं मानसमिति ।
ततो माया विद्या तदनु च महेशः शिव इतः,
परं तत्त्वातीतं मिलि-तव-पुरिन्दोः पर-कला ।।५।।
कुमारी यन्मन्त्रं ध्वनति च ततो योषिदपरा,
कुलं त्यक्त्वा काचित् स्फुटति च महा-काल-भुजगी।
ततः पातिव्रत्यं भजति दहराकाश-कमले,
सुखासीना योषा भवसि भव-सीत्कार-रसिका ।।६।।

त्रिकोणं ते कौलाः कुल-गृहमिति प्राहुरपरे,
चतुष्कोणं प्राहुः समयिन इमे बैन्दवमिति ।
सुधा-सिन्धौ तस्मिन् सुर-मणि-गृहे सूर्य-शशिनो-
रगम्ये रश्मीनां समय-सहिते त्वं विहरसे ।।७।।
त्रि-खण्डं ते चक्रं शुचि-रवि-शशाङ्कात्मकतया,
मयूखैः षट्-त्रिंशद्-दश-युत-तया खण्ड-कलितैः ।
पृथिव्यादौ तत्त्वे पृथगुदित-वद्भिः परिवृतं,
भवेन् मूलाधारात् प्रभृति तव षट्-चक्र-सदनम् ।।८।।
शतं चाष्टौ वह्नेः शतमपि कलाः षोडश रवेः,
शतं षट् च त्रिंशत्सित-मयम-यूखाश्चरणजाः ।
य एते षष्टिश्च त्रिशतमभवंस्त्वच्चरणजा,
महा-कालस्तस्मात हि तव शिवे! काल-कलना ।।९।।
त्रि - कोणं चाधारं त्रिपुर - तनु तेऽष्टारमनघे,
भवेत् स्वाधिष्ठानं पुनरपि दशारं मणिपुरम् ।
दशारं ते संवित् - कमलमथ मन्वश्रकमुमे,
विशुद्धं स्यादाज्ञा शिव इति ततो बैन्दव-गृहम् ।।१०।।
त्रिकोणे ते वृत्त-त्रितयमिभ-कोणे वसु-दलम्,
कलाश्रं मिश्रारे भवति भुवनाश्रे च भुवनम् ।
चतुश्चक्रं शैवं निवसति भगे शाक्तिकमुमे,
प्रधानैक्यं षोढा भवति च तयोः शक्ति-शिवयोः ।।११।।
कलायां बिन्द्वैक्यं तदनु च तयोर्नाद-विभवे,
तयोर्नादेनैक्यं तदनु च कलायामपि तयोः ।
तयोर्बिन्दावैक्यं त्रितय-विभवैक्यं पर-शिवे,
तदेवं षोढैक्यं भवति हि सपर्या समयिनाम् ।।१२।।
कला नादो बिन्दुः क्रमश इह वर्णाश्च चरणं,
षडब्जं चाधार-प्रभृतिकममीषां च मिलनम् ।
तदेवं षोढैक्यं भवति खलु येषां समयिनां,
चतुर्धैक्यं तेषां भवति हि सपर्या समयिनाम् ।।१३।।

तडिल्लेखा-मध्ये स्फुरति मणिपूरे भगवती,
चतुर्धैक्यं तेषां भवति च चतुर्बाहुरुदिता ।
धनुः बाणानिक्षूद्भव - कुसुमजानकुंश - वरम्,
लसत्-पाशं हस्तेरुदित-रवि-बिम्बाकृति-रुचिः ।।१४।।
भवत्यैक्यं षोढा भवति भगवत्याः समयिनां,
मरुत्-वत्-कोदण्ड-द्युति-नियुत-भासा सम-रुचिः ।
भवत् - पाणिव्रातो दश-विध इतीदं मणिपुरे,
भवानि! प्रत्यक्षे तव वपुरुपास्ते न हि परम् ।।१५।।

इत्यैक्य-निरूपणम्

भवानि! श्रीहस्तैर्वहसि फणि-पाशं सृणिमथो,
धनुः पौण्ड्रं पौष्पं शरमथ जपस्रक्-शुक-वरौ ।
अथ द्वाभ्यां मुद्रामभय-वरदानैक-रसिकाम्,
क्वणद्वीणां द्वाभ्यां त्वमुरसि कराभ्यां च बिभृषे ।।१६।।
त्रिकोणैरष्टारं त्रिभिरपि दशारं समुदभूद्,
दशारं भू-गेहादपि च भुवनाश्रं समभवत् ।
ततोऽभून्नागारं नृपति-दलमस्मात् त्रि-वलयम्,
चतुर्द्वाः प्राकार-त्रितयमिदमेवाम्ब! शरणम् ।।१७।।
चतुःषष्टिःतन्त्राण्यपि कुल-मतं निन्दितमभूद्,
यदेतन्मिश्राख्यं मतमपि भवेन्निन्दितमिह ।
शुभाख्याः पञ्चैताः श्रुति-सरणि-सिद्धाः प्रकृतयो,
महा-विद्यास्तासां भवति परमार्थो भगवती ।।१८।।
स्मरो मारो मारः स्मर इति परो मार-मदनः,
स्मरानङ्गाश्चेति स्मर-मदन-माराः स्मर इति ।
त्रि-खण्डः खण्डान्ते कलित-भुवनेश्यक्षर-युतः,
चतुः पञ्चार्णास्ते त्रय इति च पञ्चाक्षर-मनुः ।।१९।।
त्रि-खण्डे त्वन्मन्त्रे शशि-सवितृ-वह्न्यात्मकतया,
स्वराश्चन्द्रे लीनाः सवितरि कलाः कादय इह ।
भकाराद्या वह्नावथ कषयुगं बैन्दव - गृहे,
निलीनं सादाख्ये शिव-युवति नित्यैन्दव-कले ।।२०।।

ककाराकाराभ्यां स्वर-गणमवष्टभ्य निखिलं,
कला-प्रत्याहारात् सकलमभवद् व्यञ्जन-गणः ।
त्रि-खण्डे स्यात् प्रत्याहरणमिदमन्वक्कषयुग-
क्षकारश्चाकाशेऽक्षर-तनु-तया चाक्षरमिति ।।२१।।
विदेहेन्द्रापत्यं श्रुत इह ऋषिर्यस्य च मनो-
रयं चार्थः सम्यक् श्रुति-शिरसि तैत्तिर्यक-ऋचि ।
ऋषिं हित्वा चास्या हृदय - कमले नैतमृषिमि-
त्यृचाभ्युक्तः पूजा-विधिरिह भवत्याः समयिनाम् ।।२२।।
त्रि-खण्डः त्वत्-मन्त्रः तव च सरघायां निविशते,
श्रियो देव्याः शेषो यत इह समस्ताः शशि-कलाः ।
त्रि-खण्डे त्रै-खण्ड्यं निवसति समन्त्रे च सुभगे,
षडब्जारण्यानी त्रितय-युत-खण्डे निवसति ।।२३।।
त्रयं चैतत् स्वान्ते परम - शिव - पर्यङ्क-निलये,
परे सादाख्येऽस्मिन्निवसति चतुर्धैक्य-कलनात् ।
स्वरास्ते लीनास्ते भगवति कलाश्रे च सकलाः,
ककाराद्या वृत्ते तदनु चतुरश्रे च यमुखाः ।।२४।।
हलो बिन्दुःवर्गाष्टकमिभ-दलं शाम्भव-वपुः,
चतुश्चक्रं शक्र-स्थित-मनुभयं शक्ति-शिवयोः ।
निशाद्या दर्शाद्याः श्रुति-निगदिताः पञ्च-दशधा,
भवेयुः नित्यास्तास्तव जननि! मन्त्राक्षर-गणाः ।।२५।।
इमास्ताः षोडश्यास्तव च सरघायां शशि-कला-
स्वरूपायां लीना निवसति तव श्रीशशि-कला ।
अयं प्रत्याहारः श्रुत इह कला-व्यञ्जन-गणः,
ककारेणाकारः स्वर - गणमशेषं कथयति ।।२६।।
क्षकारः पञ्चाशत्-कल इति हलो बैन्दव-गृहम्,
ककारादूर्ध्वं स्यात् जननि! तव नामाक्षरमिति ।
भवेत् पूजा-काले मणि-खचित-भूषाभिरभितः,
प्रभाभिः व्यालीढं भवति मणिपूरं सरसिजम् ।।२७।।

वदन्त्येके वृद्धा मणिरिति जलं तेन निबिडं,
परे तु त्वद्रूपं मणि-धनुरितीदं समयिनः ।
अनाहत्या नादः प्रभवति सुषुम्णाध्व-जनितः,
तदा वायोस्तत्र प्रभव इदमाहुः समयिनः ।।२८।।
तदेतत्ते संवित् - कमलमिति संज्ञान्तरमुमे!,
भवेत् संवित् पूजा भवति कमलेऽस्मिन् समयिनाम् ।
विशुद्ध्याख्ये चक्रे वियदुदितमाहुः समयिनः,
सदा-पूर्वो देवः शिव इति हिमानी-सम-तनुः ।।२९।।
त्वदीयैरुद्द्योतैः भवति च विशुद्ध्याख्य-सदनम्,
भवेत् पूजा देव्या हिम-कर-कलाभिः समयिनाम् ।
सहस्त्रारे चक्रे निवसति कला - पञ्च-दशकम्,
तदेतन्नित्याख्यं भ्रमति सित-पक्षे समयिनाम् ।।३०।।
अतः शुक्ले पक्षे प्रतिदिनमिह त्वां भगवतीं,
निशायां सेवन्ते निशि चरम-भागे समयिनः ।
शुचिः स्वाधिष्ठाने रविरुपरि संवित् सर-सिजे,
शशी चाज्ञा-चक्रे हरि-हर-विधि-ग्रन्थय इमे ।।३१।।
कलायाः षोडश्याः प्रति-फलित-बिम्बेन सहितम्,
तदीयैः पीयूषैः पुनरधिकमाप्लावित-तनुः ।
सिते पक्षे सर्वास्तिथय इह कृष्णेऽपि च समा,
यदा चामावास्या भवति न हि पूजा समयिनाम् ।।३२।।
इडायां पिङ्गल्यां चरत इह तौ सूर्य-शशिनौ,
तमस्याधारे तौ यदि तु मिलितौ सा तिथिरमा ।
तदाज्ञाचक्रस्थं शिशिर-कर-बिम्बे रवि-निभम्,
दृढ-व्यालीढं सद्विगलित-सुधा-सार-विसरम् ।।३३।।
महा-व्योमस्थेन्दोरमृत-लहरी-प्लावित-तनुः,
प्रशुष्यद्वै नाडी-प्रकरमनिशं प्लावयति तत् ।
यदाज्ञायां विद्युन्नियुत - नियुताभाक्षर-मयी,
स्थिता विद्युल्लेखा भगवति विधि-ग्रन्थिमभिनत् ।।३४।।

ततो गत्वा ज्योत्स्ना-मय-समय-लोकं समयिनाम्,
पराख्या सादाख्या जयति शिव-तत्त्वेन मिलिता ।
सहस्त्रारे पद्मे शिशिर - महसां बिम्बमपरं,
तदेव श्री-चक्रं सरघमिति तद्-बैन्दवमिति ।।३५।।
वदन्त्येके सन्तः पर-शिव - पदे तत्त्व-मिलिते,
ततस्त्वं षड्-त्रिंशी भवसि शिवयोर्मेलन-वपुः ।
त्रि-खण्डेऽस्मिन् स्वान्ते परम-पद-पर्यङ्क-सदने,
परे सादाख्येऽस्मिन् निवसति चतुर्धैक्य-कलनात् ।।३६।।
क्षितौ वह्निर्वह्नौ वसु-दल-जले दिङ् मरुति दिक्-
कलाश्रे मन्वश्रं दृशि वसुरथो राज - कमले ।
प्रति-द्वैत-ग्रन्थिस्तदुपरि चतुःद्वार-सहितम्,
मही-चक्रं चैकं भवति भग-कोणैक्य-कलनात् ।।३७।।

इति मन्त्र-चक्रैक्यम्

षडब्जारण्ये त्वां समयिन इमे पञ्चक-समाम्,
यदा संविद्रूपां विदधति च षोढैक्य-कलिताम् ।
मनो जित्वा चाज्ञा - सरसिज इह प्रादुरभवत्,
तडिल्लेखा नित्या भगवति तवाधार-सदनम् ।।३८।।
भवत् साम्यं केचित् त्रितयमिति कौल-प्रभृतयः,
परं तत्त्वाख्यं चेत्यपरमिदमाहुः समयिनः ।
क्रियावस्था-रूपं प्रकृतिरभिधा-पञ्चक - समं,
तदेषां साम्यं स्याद्वनिषु च यो वेत्ति स मुनिः ।।३९।।

इत्यैक्य-निरूपणम्

वशिन्याद्या अष्टावकचटतपाद्याः प्रकृतयः,
स्ववर्गस्थाः स्वस्वायुध-कलित-हस्ताः स्वविषयाः ।
यथा-वर्गं वर्ण-प्रचुर - तनवो याभिरभवम्-
स्तव प्रस्तारास्ते त्रय इति जगुस्ते समयिनः ।।४०।।

इमा नित्या वर्णास्तव चरण-सम्मेलन-वशात्,
महा-मेरुस्थाः स्युर्मनु-मिलन-कैलास-वपुषः।
वशिन्याद्या एता अपि तव स-बिन्द्वात्मकतया,
मही-प्रस्तारोऽयं क्रम इति रहस्यं समयिनाम् ।।४१।।

इति प्रस्तार-त्रय-निरूपणम्

भवेत् मूलाधारं तदुपरितनं चक्रमपि तद्-
द्वयं तामिस्राख्यं शिखि-किरण-सम्मेलन-वशात् ।
तदेतत्कौलानां प्रति - दिनमनुष्ठेयमुदितं,
भवत्या वामाख्यं मतमपि परित्याज्यमुभयम् ।।४२।।
अमीषां कौलानां भगवति भवेत् पूजन-विधिः,
तव स्वाधिष्ठाने तदनु च भवेत् मूल-सदने ।
अतो बाह्या पूजा भवति भग-रूपेण च ततो,
निषिद्धाचारोऽयं निगम विरहोऽनिन्द्य चरिते ।।४३।।
नव-व्यूहं कौल-प्रभृतिक-मतं तेन स विभुः,
नवात्मा देवोऽयं जगदुदयकृद्भैरव - वपुः ।
नवात्मा वामादि-प्रभृतिभिरिदं भैरव-वपुः,
महा-देवी ताभ्यां जनक-जननीमज्जगदिदम् ।।४४।।
भवेदेतच्चक्र - द्वितयमतिदूरं समयिनाम्,
विसृज्यैतद्युग्मं तदनु मणिपूराख्य - सदने ।
त्वया सृष्टैर्वारि-प्रति - फलित सूर्येन्दु-किरणैः,
द्विधा लोके पूजां विदधति भवत्याः समयिनः ।।४५।।
अधिष्ठानाधार - द्वितयमिदमेवं दश - दलम्,
सहस्त्राराज्जातं मणिपुरमतोऽभूद् दश-दलम् ।
हृदम्भोजात् मूलात् नृपदलमभूत् स्वान्त - कमलं ,
तदेवैको बिन्दुर्भवति जगदुत्पत्ति-कृदयम् ।।४६।।
सहस्त्रारं बिन्दुर्भवति च ततो बैन्दव - गृहं,
तदेतस्माज्जातं जगदिदमशेषं सकरणम् ।
ततो मूलाधाराद् द्वितयमभवत् तद्दश-दलं,
सहस्त्राराज्जातं तदिति दशधा बिन्दुरभवत् ।।४७।।

तदेतद् - बिन्दोर्यद्दशकमभवत्तत् - प्रकृतिकं,
दशारं सूर्यारं नृप-दलमभूत् स्वान्त-कमलम् ।
रहस्यं कौलानां द्वितयमभवन्मूल - सदनं,
तथाधिष्ठानं च प्रकृतिमिह सेवन्त इह ते ।।४८।।
अतस्ते कौलास्ते भगवति दृढ-प्राकृत-जना,
इति प्राहुः प्राज्ञाः कुल-समय-मार्गद्वय-विदः ।
महान्तः सेवन्ते सकल-जननीं बैन्दव-गृहे,
शिवाकारां नित्याममृत-झरिकामैन्दव-कलाम् ।।४९।।
इदं कालोत्पत्ति-स्थिति-लय-करं पद्म-निकरं,
त्रि-खण्डं श्री-चक्रं मनुरपि च तेषां च मिलनम् ।
तदैक्यं षोढा वा भवति च चतुर्धेति च तथा,
तयोः साम्यं पञ्च-प्रकृतिकमिदं शास्त्रमुदितम् ।।५०।।
उपास्तेरेतस्याः फलमपि च सर्वाधिकमभू-
त्तदेतत् कौलानां फलमिह हि चैतत् समयिनाम् ।
सहस्त्रारे पद्मे सुभग - सुभगोदेति सुभगे,
परं सौभाग्यं यत्तदिह तव सायुज्य - पदवी ।।५१।।
अतोऽस्याः संसिद्धौ सुभग-सुभगाख्या गुरु-कृपा-
कटाक्षव्यासङ्गात् स्त्रवदमृत-निष्यन्द-सुलभा ।
तथा विद्धो योगी विचरति निशायामपि दिवा,
दिवा भानू रात्रौ विधुरिव कृतार्थी-कृत-मतिः ।।५२।।
।।परम पूज्य श्रीगौडपादाचार्यवर्य-विरचिता श्री सुभगोदयः स्तुतिः।।

★★★

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीमकरन्द-स्तव-राज

विनियोग–ॐ अस्य श्रीमकरन्द-स्तव-राज-मन्त्रस्य ब्रह्म-विद्यायाः श्रीदक्षिणा-मूर्ति ऋषिः, अव्यक्त गायत्री छन्दः, श्रीमन्महा-त्रिपुर-सुन्दरी देवता, अं बीजं, आं शक्तिः, सौः कीलकं, दश-मुद्रा-ब्रह्मोपासन-सौभाग्यं चतुर्वर्गाप्तये विनियोगः।

ऋष्यादि-न्यास–ॐ श्रीदक्षिणा-मूर्ति-ऋषये नमः शिरसि। अव्यक्त-गायत्री-छन्दसे नमः मुखे। श्रीमन्महा-त्रिपुर-सुन्दरी-देवतायै नमः हृदि। अं-बीजाय नमः लिङ्गे-योनौ वा। आं-शक्तये नमः नाभौ। सौः-कीलकाय नमः पादयोः। दश-मुद्रा-ब्रह्मोपासन-सौभाग्याय चतुर्वर्गाप्तये विनियोगाय नमः सर्वाङ्गे।

कर-न्यास–श्रीं ह्रीं क्लीं ऐं सौः अंगुष्ठाभ्यां नमः। ॐ ह्रीं श्रीं तर्जनीभ्यां नमः। क-ए-ई-ल-ह्रीं मध्यमाभ्यां नमः। ह-स-क-ह-ल-ह्रीं अनामिकाभ्यां नमः। स-क-ल-ह्रीं कनिष्ठिकाभ्यां नमः। सौः ऐं क्लीं ह्रीं श्रीं करतल-कर-पृष्ठाभ्यां नमः।

षडङ्ग-न्यास–श्रीं ह्रीं क्लीं ऐं सौः हृदयाय नमः। ॐ ह्रीं श्रीं शिरसे स्वाहा। क-ए-ई-ल-ह्रीं शिखायै वषट्। ह-स-क-ह-ल-ह्रीं कवचाय हुम्। स-क-ल-ह्रीं नेत्र-त्रयाय वौषट्। सौः ऐं क्लीं ह्रीं श्रीं अस्त्राय फट्।

ध्यान –

बालार्कायुत-तेजसं त्रि-नयनां रक्ताम्बरोल्लासिनीम्।
नानालंकृति-राजमान-वपुषं बालोडुराट्-शेखराम्।।
हस्तैरिक्षु-धनुः सृणिं सुमशरं पाशं मुदा बिभ्रतीम्।
श्रीचक्र-स्थित-सुन्दरीं त्रि-जगतामाधार-भूतां स्मरेत्।।१

बालार्क - मण्डलाभासां, चतुर्बाहां त्रि - लोचनाम्।
पाशांकुश - शरांश्चापं, धारयन्तीं शिवां भजे।।२

मानस-पूजन–

'लं पृथिव्यात्मकं गन्धं श्रीमहा-त्रिपुर-सुन्दरी-पादुकाभ्यां नमः अनुकल्पयामि।'
यह पढ़कर अधो-मुख कनिष्ठा-अंगुष्ठ-योग से गन्ध-मुद्रा दिखाए।

'हं आकाशात्मकं पुष्पं श्रीमहा-त्रिपुर-सुन्दरी-पादुकाभ्यां नमः अनुकल्पयामि।'
यह पढ़कर अधो-मुख तर्जनी-अंगुष्ठ-योग से पुष्प-मुद्रा दिखाए।

'यं वाय्वात्मकं धूपं श्रीमहा-त्रिपुर-सुन्दरी-पादुकाभ्यां नमः अनुकल्पयामि।'
यह पढ़कर ऊर्ध्व-मुख-तर्जनी-अंगुष्ठ-योग से धूप-मुद्रा दिखाए।

'रं वन्ह्यात्मकं दीपं श्रीमहा-त्रिपुर-सुन्दरी-पादुकाभ्यां नमः अनुकल्पयामि।'
यह पढ़कर ऊर्ध्व-मुख मध्यमा-अंगुष्ठ-योग से **दीप-मुद्रा** दिखाए।

'वं अमृतात्मकं नैवेद्यं श्रीमहा-त्रिपुर-सुन्दरी-पादुकाभ्यां नमः अनुकल्पयामि।'
यह पढ़कर ऊर्ध्व-मुख अनामा-अंगुष्ठ-योग से **नैवेद्य-मुद्रा** दिखाए।

'शं शक्त्यात्मकं ताम्बूलं श्री महा-त्रिपुर-सुन्दरी-पादुकाभ्यां नमः अनुकल्पयामि।'
यह पढ़कर ऊर्ध्व-मुख अंगुष्ठ एवं सर्वांगुलियों से **ताम्बूल-मुद्रा** दिखाए।

## श्रीमकरन्द-स्तव-राज

**ॐश्रीं** ॐ श्रीं-बीजे नाद-बिन्दु-द्वितय-शशि-कलाकार-रूप-स्वरूपे,
मातर्मे देहि ऋद्धिं जहि जहि दुरितं पाहि मां दीन-नाथे!
अज्ञान-ध्वान्त-राशिं क्षपय सु-रुचिरे प्रोल्लसत्पाद-पद्मे,
ब्रह्मेशाद्यैः सुरेन्द्रैः सुर-गण-नमिते संस्तुते त्वां नमामि ।।१।।

**ह्रीं** ह्रीं-लज्जा-बीज-स्वरूपे त्रि-जगति वरदे क्रीडया या स्थितेयम्,
तां नित्यां शम्भु-शक्तिं त्रि-भुवन-जननीं पालयित्रीं जगच्च ।
सर्वाशानां निदानं सकल-गुण-मयीं सच्चिदानन्द-रूपाम्,
तेजो-रूपां प्रदीप्तां त्रि-भुवन-नमितां ज्ञान-दात्रीं नमामि ।।२।।

**क्लीं** क्लीं-बीजे, काम-रूपे, धृत-कुसुम-धनुर्वाण-पाशांकुशा ताम्,
वन्दे भास्वत्-सरोजोदर-निभ-वपुषां मोहयन्तीं त्रिलोकीम् ।
काञ्ची मञ्जीर-हाराङ्गद-मुकुट-लसत्-स्वर्ण-माणिक्य-रत्नैः,
भास्वत्-सिन्दूर-वक्त्रां स्तन-भर-नमितां क्षीण-मध्यां त्रिनेत्राम् ।।३।।

**ऐं** ऐं-वाणी-बीज-रूपे त्रिभुवन-जडता-ध्वान्त-विध्वंसिनी त्वम्,
शैव-ब्रह्म-स्वरूपा श्रुतिभिरनु-पदं गीयमाना त्वमेव ।
मातर्मे देहि बुद्धिं मम सदसि पर-द्वन्द्व-संक्षोभ-कर्त्रीम्,
ऐन्द्रीं वाचस्पतेरप्यति-विविध-पदं त्वत्-पदाम्भोजमीडे ।।४।।

**सौः** सौः शक्तिः कार्यमन्ते घट-पट-प्रभृतौ दृष्ट-हेतोः सहाया,
माया काचिन्महत्त्व-प्रभृति-परिणता मूल-भूता त्वमेव ।
केचिद् बाह्य-प्रपञ्चा-मणि-निवह-तनौ तन्त्र-भूता त्वमेव,
विद्या-जन्मादि-वृन्दं क्षपयति जगतां मे निरे शुद्ध-भावाः ।।५।।

ॐ ॐ मातस्ते नमस्ते श्रुति-प्रथित-गुरु-त्र्यक्षर-ब्रह्म-रूपे,
मिथ्या-मोहान्धकारे पततिमनु-दिनं पाहि मां भक्ति-हीनम् ।
मोहः क्रोधः प्रलोभः प्रथम-मद-चयैः शत्रुभिः पीड्यतेऽसौ,
पत्नी-पुत्रादि-भृत्यैर्नत-विविध-जनैः शृङ्खलाभिर्निबद्धैः ।।६।।

ह्रीं ह्रीङ्कारे ह्रीं-स्वरूपे मम दह दुरितं व्याधि-दारिद्र्य-वीजम्,
मा.स्त्वत्-पाद-पद्म-द्वितय-परिसरे प्रार्थये भक्ति-लेशम् ।
त्वं वाणी त्वं च लक्ष्मीस्त्वमसि गिरि-सुता ब्रह्म-विष्णु-स्मरारे,
चित्तं नित्यं शरण्यं कृतमिह जननि! त्वत्-कटाक्षैक-वृन्दैः ।।७।।

श्रीं श्रींकारे श्री-स्वरूपे वितर मयि धनं धान्य-हस्त्यश्व-युक्तम्,
स्वर्णं माणिक्य-रत्नाद्यभिलषित-युतं त्वत्-पदार्चा सु-योग्यम् ।
विद्यां त्वं देहि मोक्षं भव-भय-दहने देवि! दं दह्यमाने,
योगेन्द्रैः सेव्य-माना हत-कलुष-चयैर्मोक्षमन्वेषयद्भिः ।।८।।

क-५ कामो योनिश्चतुर्थः स्वर-त्रिदश-पतिर्भौवनेशी च वीजम्,
तावद् वर्णावली त्वं नत-जन-वरदे, भक्तिमीहे शरण्ये ।
त्वत्-पादाम्भोज-युग्मं हृदय-सरसिजे सन्निधायेक-चित्ते,
ध्यात्वा तत्-कर्म-बन्धं त्वति-विमल-धियो मुक्ति-वन्तो मुनीन्द्राः ।।९।।

ह-६ ब्रह्मेन्दुः काम - देवो वियदमर - गुरुर्भौवनेशी च वीजम्,
तावद् वर्ण-स्वरूपैर्घटित-तनु-लतां त्वां प्रपन्नोऽस्मि मातः!
विष्णु-ब्रह्मेश-मूर्ति-स्थित-मुकुट-मणि-प्रोल्लसत्-पाद-पद्माम्,
योगीन्द्रैर्ध्येय-पादाम्बुरुह-स्वर-नख-द्योत-विद्योतितां त्वाम् ।।१०।।

स-४ इन्दुः कामः सुरेशा वियदनलसद् - वाम - नेत्रार्द्ध-चन्द्रैः,
युक्तं यद् - वीजमेतत् तदपि तव वपुः सच्चिदानन्द-रूपम्।
बाला त्वं भैरवी त्वं त्रिभुवन - जननी तारिणी नील-वर्णा,
त्वं गौरी त्वं च काली सकल-मनु-मयी त्वं महा-मोक्ष-दात्री ।।११।।

सौः सौः-कारो बीज-राजस्त्रिभुवन-जननी शक्तिराद्या त्वमेव,
त्वद्-युक्तः शम्भुरेषः प्रभवति चलितुं त्वां विना जाड्य-वान् सः ।
ब्रह्मा विष्णुः कपर्दी जननि! तव कृपा - लेश - मात्राच्छरीरम्,
गृह्णन्तः सृष्टि-रक्षा-प्रलयमभिलसच्चक्रिरे त्वद्-वशस्थाः ।।१२।।

ऐं ऐं-वीजं वाग्भवाख्यं त्वमिह जडमति-ध्वान्त-चक्षुः प्रकाशान्,
मातः! कारुण्य-धाराममृत-बलि-दृशा पश्य मां दीन-नाथे!
मोह्यन्ते मोहितास्ते तव जननि! महा - मायया बद्ध-चित्ताः,
कारुण्यं प्रार्थयन्ते तव पद-युगले ज्ञान - वन्तो मुनीन्द्राः ।।१३।।

क्लीं क्लींकारो वीज-रूपा तव जननि! मनु-श्लेष-मध्य-प्रवेशात्,
साक्षाद्-ब्रह्म-स्वरूपी मदन-तनु-लता ब्रह्मणो मोह-कर्त्री।
साज्ञानं स्मेर-वक्त्राम्बुज-कुहर-लसत्-सुप्त-पीयूष-धारा,
वेदाश्चत्वार एते तुहिन - गिरि-सुते! प्राप्तमीनेन्द्र-रूपे ।।१४।।

ह्रीं ह्रीङ्कारोङ्कार-रूपा त्वमिह शशि-मुखी ह्रीं-स्वरूपा त्वमेव,
त्वं सिद्धिः त्वं च ऋद्धिः स्मर-रिपु-मनमस्त्वं च सम्मोहयन्ती ।
त्वं क्षान्तिस्त्वं च कान्तिर्हरि-हर-कमलोद्भूत-रूपा त्वमेव,
विद्या त्वं मुक्ति - हेतुर्भव-जलधि-जनुर्दुःख - हन्त्री त्वमेव ।।१५।।

श्रीं श्रीं-वीजे, श्री-स्वरूपे, मधु-रिपु-मनसो मध्य-मध्या सिता त्वम्,
मातस्त्वद्-वृष्टि-लेशावमर - पति रसौ प्राप्तवान् बुद्धिमेषाम् ।
इत्येवं षोडशार्णं सरस मनु - दिनं स्वर्ग - मोक्षैक - हेतुम्,
सिद्धीरष्टौ लभन्ते यः इह मनु - वरं श्रेष्ठमेनं भजन्ते ।।१६।।
।। श्रीरुद्र-यामले मकरन्द-स्तव-राज-स्तोत्रं सम्पूर्णम् ।।

कामो योनिश्चतुर्थः स्वर-त्रिदश-पतिर्भौवनेशी च वीजम्
(कामः=क, योनिः=ए, चतुर्थ स्वरः=ई, त्रिदश-पति=ल, भुवनेशी=ह्रीं)।
ब्रह्मेन्दुः काम - देवो वियदमर - गुरुर्भौवनेशी च वीजम्
(ब्रह्म=ह, इन्दुः=स, काम-देवो=क, वियत्=ह, अमर-गुरु=ल, भुवनेशी= ह्रीं)।
इन्दुः कामः सुरेशा वियदनलसद् - वाम - नेत्रार्द्ध-चन्द्रैः
(इन्दुः=स, कामः=क, सुरेशा=ह, वियदनलसद् - वाम - नेत्रार्द्ध-चन्द्रा= ह्रीं)।

★★★

# श्री श्रीविद्या वृहत् कर्पूर-स्तोत्रम्

सपूज्य शुक्लारुण-चक्र-चारिणीं, मूलादि-विन्द्वान्तर्गतां विभावयन्।
स्थिति-स्वरूपां हृदयारविन्दगामीडेश-पाशांकुश-वाण-चापिनीम्।।१।।

कर्पूरं पूर-रेफैर्विरहितममलं योनि-युक्तं महेशीकारोपेतं ललज्जा-युतमपि वरदे, देवि! वाक्-कूटमाहुः । एतन्नित्यं जपन्ति स्मर-हर-महिले! तर्क-काव्याऽऽगमज्ञास्तान् मुञ्चत्यब्ज-हस्ता कथमपि न च ते साधकाः सम्भवन्ति ।।२।।

ईशानः सोम-मारौ गिरिश-शत-मखौ भौवने शाख्य-बीजमित्थं ते काम-कूटं प्रजपति सु-जनो वारमेकं कदा-चित् । पार्श्वे नृत्यन्ति कामाकुलित-मृग-दृशाः प्राणदाः साधकस्य, नित्यं निर्वाण-विद्या विलसति हृदयाम्भोज-मध्ये च तस्य ।।३।।

सोमः कामेन्द्र-लज्जा-युतमिदमनिशं शक्ति-कूटं तृतीयम्,
प्रातर्यश्चन्द्र-चूडां विकसित-वन्दनाम्भोज-संशोभितां त्वाम् ।
ध्यायन् राजाधि-राजेश्वरि! जपति जनः शान्त-चित्तः प्रकामम्,
स स्यात् त्रैलोक्य-नाथः सुर-मुनि-दनुजैः सेव्य-मानो महात्मा ।।४।।

सर्वं वागादि-कूट-त्रयमपि ललिते! दिश्य कौलावतंसम्,
कौल-ज्ञानैक-गम्यां धृत-कुसुम- धनुर्वाण-पाशांकुशां त्वाम् ।
त्रैलोक्याकर्षकः स्याद् यदि जपति सदा भावयन् रक्त-वर्णां,
प्रातः स्वान्तोपचारैरतुलित-विभवेऽभ्यर्च्यं मूलाम्बुजस्थाम् ।।५।।

जपित्वा लक्ष-त्रयं ते मनुमनल-मुखे तद्-दशांशं विधाय,
कुर्याद् यश्चक्र-पूजां सुर-गण-नमिते! श्री-युतः स्यात् स एव ।
पृथ्वी - पालोत्तमांङ्गासृत - मणि - मुकुट - ज्वालिनी,
राजिताङ्घ्रिर्वाचालः काव्य-कर्त्ताऽमर-पुर-गणिका-चित्त-चौरश्चिरायुः ।।६।।

वाक् - कूटं तदनु तव शिवे! शक्ति - कूटं नियोज्य,
श्री-युक्तं मन्त्रमेतज्जपति पर-शिवां षोडशीं षोडशार्णाम् ।
ध्यायेत् पाशांकुशां त्वामभय-वर-करां सोम-सूर्याग्नि-नेत्राम्,
रक्तां चन्द्रावतंसां स भवति सकलैश्वर्य-युक्तः कुलज्ञः ।।७।।

तारं मायां स-पद्मां तदनु निगदितं देवि! कूट-त्रयं च,
श्री-माया-काम-वाणो स्मर-हर-दयिते! शक्ति-युक्तैस्तदेतैः।
इत्युक्तैः पञ्च-बीजैः कृत-पुटित-महा-बीज-षट्कं विधाय,
श्रीविद्ये! बीज-रूपं भवति तव मनुं श्री-युतं मोक्षदं च ।।८।।

मातः श्रीमन्त्र-राज स्मरति यदि जनो वारमेकं जितात्मा,
कामेशाङ्क-स्थितां त्वामरुणित-वसनां सु-स्मितामम्बुजस्थाम् ।
खं व्योमाकाश चन्द्र-प्रमित-दल-युताम्भोज-मध्ये विभाव्य,
सर्वैः पापैर्विमुक्तस्तदवधि-चरितैः पुण्य-रूपः स एव ।।९।।

तारान्ते वाक्-त्रपान्ते स्मरमपि कमलान्तेऽपि तच्छक्ति-कूटम्,
पूर्वोक्तैः पञ्च-बीजैः कृत-पुटित महा-मन्त्र-राजं तवेदम् ।
ध्यायन् विद्याक्ष-पाशांकुश-कर-कमलां गौर-वर्णां त्रि-नेत्राम्,
सर्वज्ञः स्याज्जपेद् यः कुल-पथ-विधिना श्रीमहा-षोडशीं त्वाम् ।।१०।।

शक्त्याख्यं चैव कामं प्रथम-निगदितं कूटमब्जासनाढ्याम्,
माया-वेदादि-युक्तं पुटितमपि सदा पञ्च-बीजैः पुरोक्तैः ।
ध्यायन् नीलाम्बरां त्वां शशि-सकल-धरां पान-पात्रां त्रिनेत्राम्,
त्रैलोक्यं क्षोभयेद् यः प्र-जपति विधिना दीक्षितः कौलिकेन्द्रः ।।११।।

मातः! श्री-मन्त्रमेतत् त्रितयमपि सदा दिव्य-भावानुरक्तो,
दीक्षां सम्प्राप्य यत्नाज्जपति निज-गुरु-प्रोक्त-मार्गेण कश्चित् ।
जीवन्मुक्तः स एव त्रिभुवन-विजयी सर्व-वेद गमज्ञः,
साक्षान्नारायणस्य प्रति-निधिरचिरात् त्वत्-पदं प्राप्नुयाद् यः ।।१२।।

प्रातः श्री-चक्र-संस्थामविरतं महिलाभिर्युतः साधकेन्द्रः,
शुक्लैर्वोक्तोपचारैः क्रम-पथ-निहितैर्मन्त्र-वर्यैः समर्च्य ।
साङ्गां साम्नाय-विद्यामकुल-कुल-गतां षोडशाधार-मूलाम्,
ध्यायन् यो वर्ण-लक्षं जपति शिव-समः स्यान्महा-षोडशीं त्वाम् ।।१३।।

त्रि-वृत्तं भू-गेहे रस-विधु-दलान्तर्वसु-दलम्,
ततो मन्वस्रान्तः सु-ललित-दशार-द्वयमपि ।
तदन्तः सर्पारं जननि! कुल-बालार्क-सदृशम्,
त्रिकोणं तन्मध्ये विमल-तर-विन्दुर्भगवति ।।१४।।

तवेदं श्रीचक्रं जगदखिलमात्मा त्वमिति च,
शरीरं तच्छैवं चिदपि परमे शाक्तममलम् ।
गुरोर्ज्ञात्वा सर्वं वि-लिखति सदा भावन-परस्त्रि-
लक्षं सिन्दूरैः स भवति नरेन्द्रः क्षिति-तले ।।१५।।

सुधाक्तैः सिन्दूरैरपि कुल-रजोभिः सुरुचिरम्,
विलिख्य श्रीचक्रं प्रणमति च सन्तर्पयति यः ।
निशायां प्रालेयाचल-कुल-महोत्तंस-कलिके!,
भवेच्छक्त्या युक्तः सकल-जगतामेव वश-कृत् ।।१६।।
गुरु-प्रोक्तैर्मार्गैः पर-शिव-मुखाम्भोज-मुदिते!,
स्व-देहे श्री-चक्रं सततमपि सञ्चिन्तयति यः।
स योगीशो वाग्मी वर-निकर-चूडा-मणिरपि,
प्रवाल-प्राले य प्र-भजति सु-गुप्तं प्रभवति ।।१७।।
तदस्मिञ्छ्री-पीठाश्रित-रुचिर-सिंहासन-गताम्,
महा-पञ्च-प्रेतैः सुर-निकर-कोलैश्च सहिताम् ।
स-मुक्ता-माणिक्यैरसुर-विवुधालभ्य-मणिभिः,
कृताङ्गालङ्कारां जित-मदन-रूपां त्रि-नयनाम् ।।१८।।
नवीनादित्याभां धृत-शशि-कलां मुक्त-चिकुराम्,
शरांश्चापं पाशं शृणिमपि धृतां हस्त-कमलैः ।
महा-कामेशाङ्के कृत-निवसतीं रक्त-वदनां,
स्मितं कामं दृष्ट्वा स्मित-मुख-सरोजां पर-शिवाम् ।।१९।।
जनो यो ध्यायेत् त्वामकुल-कुल-मार्ग-क्रम-युतः,
समर्चायां नित्यं भुवन-भय-भङ्ग-व्यसनिनि!
मयूखाभिस्ताभिः प्रकट-वदनाभिश्च सहिताम्,
चतुः-पीठासीनां त्रि-दश-गण-वन्द्यः स भवति ।।२०।।
शिवे! त्वं संक्षोभिण्यसि जननि! विद्रावण-करी,
परे! सर्वाकर्षिण्यसि सु-ललिते! सर्व-वशिनी ।
अजे! सर्वोन्मादिन्यसि भगवति! त्वं त्रि-नयने!,
त्वमेका कल्याणीश्वरि! कुल-महेश्यंकुश-धरी ।।२१।।
भवाधारे! खेचर्यसि जननि! बीजा त्वमसि च,
महा-योनिस्त्वं वै निखिल-भुवनानामपि सदा ।
त्रिखण्डा-रूपा त्वं जगदघ-हरे! कौल-सुखदे!,
करे मुद्रा-रूपा ब्रजसि यदि कस्यापि स शिवः ।।२२।।

समाराध्यां देवीं सकल-कुल-मुद्रा-क्रम-युताम्,
विभाव्य त्वां नित्यं परम-शिव-पर्यङ्क-निलये!,
गुरूक्तेस्तद्-वीजैः सह-रचित-मुद्रास्तव मुदे!,
पुरस्त जायन्ते मदन-हर-तुल्याः सुर-नुताः ।।२३।।
उमा त्वं काली त्वं त्वमसि भुवना दुर्गति-हरे!,
परा-गुह्या तारा स्मर - हर-सती चन्द्र-वदने!
महा-कुब्जा बाला त्रिपुर-ललिता त्वं च विमले!,
रमा वाणी सर्वावरण-जननी त्वं भगवति! ।।२४।।
कलाभिर्नित्याभिस्तिथि-परिमिताभिः परि-वृतां,
समभ्यर्चच्छ्री-मद्-गुरु-कुलमपि प्रोक्त-विधिना ।
स्मरेद् यस्त्वामङ्गाश्रित-युवति-षड्भिः स्मित-मुखि!,
स सर्वार्थावाप्तः प्रमुदित-मना स्यादिह सदा ।। २५।।
धरित्रि चक्रस्थां स्फटिक-दृशवच्छच्छवि-मयीम्,
त्रिनेत्रामम्भोज-द्वय-धृत-करां पुस्तक-धराम् ।
तथाक्ष-स्त्रग्धस्तां प्रकट-जननीभिः परि-वृताम्,
स चार्वाकां रम्यां निखिल-भव-सम्मोहन-कराम् ।।२६।।
त्रि-वृत्तस्थां रक्तां कठिन-कुच-भारां त्रि-नयनाम्,
विचित्रालङ्कारामभय-युत-विद्याक्ष-वरदाम् ।
महाक्षैः संयुक्तां स विजित-मनस्कांश्च युवतीम्,
सदा त्रै-वर्गाणां फलमपि सकृत्-साधन-कराम् ।।२७।।
कला-पत्राब्जस्थां हिम गिरि-निभां शुभ्र-वसनाम्,
महा-गुप्ताख्याभिः कर-कलित-पाशामभि-युताम् ।
त्रिनेत्रां पाणिभ्यामभय - वरदामंकुश - कराम्,
स बौद्धां सर्वेषामभिलषित-दानाश्वासनिनीम् ।।२८।।
जपा - पुष्पारक्तामभय - वर - वद्याक्ष-विलसत्,
कराम्भोजामष्टच्छद-कमल-संस्थां त्रि-नयनाम् ।
सदैनां देवीं गुप्त-तर-सकलाभिः परि-वृताम्,
सुधासक्तां शान्तां पशु-जन-महा-क्षोभण-कराम् ।।२९।।

सदा शक्रारस्थामरुण वसनां सम्पद - युत–
प्रदायाख्याभिस्ताभिरखिल-सु-सौभाग्य-जननीम् ।
त्रि-नेत्रां विद्याक्षाभय-वर-कराब्जैरपि युताम्,
स-सांख्यां स्वच्छन्दां स्मित-मुख-सरोजां च सुभगाम् ।।३०।।
सहस्रार्काभासामखिल-कुल-कौलादि-सहिताम्,
त्रि-नेत्रां विद्याक्षाभय-वर-करां रक्त-वसनाम् ।
बहिः खैकारस्थां निखिल-निगमैः संयुत-पदाम्,
सतां सर्वार्थानामपि सु-तरसा साधन-करीम् ।।३१।।
दशारस्थामन्तः सकल - सुर-रक्षण - करीम्,
प्रवालारक्ताभां त्रि-नयन-युक्तां साभय-वराम् ।
स-पाशां शृण्याढ्यां सु-रुधिर-कपालं जप-वटीम्,
धृतां सौरोपेतामभि - नुत निगर्भादि-सहिताम् ।।३२।।
शशाङ्काभां शुभ्राभरण-वसनां स-स्मित-मुखीम्,
त्रि-नेत्रां तां पाशांकुश-युत-कपालाभय-कराम् ।
रहस्याभिर्युक्तां निखिल-भव-रोग-क्षय-करीम्,
सदाष्टारे संस्थां सु-मद-मुदितां वैष्णव-युताम् ।।३३।।
महा - चक्रे कोणाश्रित - भुवन-कूटादि-सहिते,
स्थितां माणिक्याभामभय-वरदां पुस्तक-धराम् ।
तथा सालङ्कारां स्फटिक-गुटिका-मण्डिता-कराम्,
त्रि-नेत्रां मुण्डाढ्यामपि कुसुम-मालां च दधतीम् ।।३४।।
स्मितास्यामारक्तामरुण-वसनां मन्द-हसिताम्,
निशा-नाथोत्तंसामभय-वर-विद्याक्ष-सहिताम् ।
त्रि-नेत्रां पञ्चाशत्-परिमित-महा-मुण्ड-रचिताम्,
दधानां तां मालां गलित-चिकुरां रत्न-खचिताम् ।।३५।।
क्रमात् त्वां नित्यं यः स्मरति दश-चक्रेषु परमे,
पुनस्तत्तन्मन्त्रैः सह-कुल-गुरु-प्रोक्त-विधिना।
स वित्ते वित्तेशः सुर-गुरु-समः शास्त्र-कुशलो,
भवेत् त्रैलोक्याधीश्वरि! तव दयापाङ्ग-विषयः ।।३६।।

प्रतीहारान् मातस्तव चरण-विद्यां च ललिते!,
प्रपञ्चाख्यां विद्यां तदनु दश-दिक्-पाल-निवहाम् ।
ततस्तेषां शस्त्राण्यपि कुल-पथाभ्यर्च्य मुदितः,
कहानन्ताराध्ये! ब्रजति परम-धाम मनुजः ।।३७।।

रसैकास्यामम्बां धृत-शशि-कलां मुक्त-चिकुराम्,
त्रि-नेत्रामापीनोन्नत-कुच-युगां रक्त-वसनाम् ।
हरि - ब्रह्मेशानाजिनमभिधानां कर—
शतैरथाष्टोपेतैर्वा सुर-निकर-युक्तैरपि युताम् ।।३८।।

महा - पञ्च - प्रेतोपरि रुचिर-सिंहासनमथो,
परीशस्तन्नाभ्युद्भवममल-रक्ताभ - कमलम् ।
श्मशानं तन्मध्ये वृषभ-विगतानन्द-पुरुषोरसिस्थाम्
यो ध्यायेज्जननि! स हि मोक्षं च लभते।।३९।।

स्मरेन्निर्वाणाख्यं तव चरण-सम्पूजन - विधौ,
षडाम्नायोपेतां ब्रज-गतममुं पञ्च - वदनम् ।
कराम्भोजैः पद्मानि च दश दधानां च दशभिर्महा—
विद्या-युक्तं किमपि कुल-कल्पं विदधतम् ।।४०।।

जपेद् यस्तवन्मन्त्रं जननि! सकलाम्नाय-जनकम्,
सदा सर्वाचारैरपि यजन-शीलः प्रमुदितः ।
स वाग्-मार-श्री-सम्पुटित-दश-कूटात्मकमथ,
श्रुति-श्री-शाकिन्यादिकमिति सु-गुह्य-द्वयमपि ।।४१।।

स जीवन-मुक्तः स्यादिह जननि! निर्वाण-सुखदे!,
पयोधिः सिद्धिर्नाममर - दितिजवन्दित-पदः ।
बहूक्तैः किं पञ्चानन-दश-शतास्याह्यविदिते,
महिम्ना संयुक्तो मदन-महिला-मोहन-करः।।४२।।

जनो यो हालाभिर्जननि! तव सम्पूज्य चरणौ,
करे पात्रं धृत्वा भगवति! कुल-ज्ञान-निरतः ।
सहस्रारे ध्यात्वा पर-शिव-गुरुं शक्ति-सहितम्,
पिवेद् वामोच्छिष्टं स हि भवति शम्भोः प्रति-निधिः ।।४३।।

कुलागारं पश्यन्नति-दृढ-मना यस्तव मनुम्,
जपेल्लक्षं रात्रौ रहसि च मदामोद-मुदितः ।
तथा श्री-दूतीं तां गज-दशन-पर्यङ्क-निलयाम्,
यजेद् यस्त्वद्-रूपां स भवति हरिमन्मथ-कले!।।४४।।
स्मरागारे कुर्वन निज-कर-सरोजं त्रि-नयने!,
त्रि-लक्षं त्वन्मन्त्रं भगवति! सदा घोर-विधिना ।
महा-पीठे मातस्तव दश-शतार्णं शुभ-मनुम्,
जपेद् यः कौलेन्द्रः स हि भुवन-सौख्यं च लभते ।।४५।।
शिवे! लक्षं मन्त्रं जपति विपरीतो यदि नरः,
स एव श्री-मातः! सकल-भुवनानामधि-पतिः ।
शवारूढः कौलः पितृ - वन - गतः श्री-क्रम—
युतस्त्रिकूटाख्यां विद्यामपि जपति स स्यात् कुल-पतिः।।४६।।
नरं मेषं छागं महिषमपि मार्जारमथवा,
शुभं मत्स्यं हंसं हरि - हर-नुते कुक्कुटमपि ।
बलिं ते पूजायां वितरति यदा कौलिके—
जनस्तदा क्रोधादीनामपि रिपु-गणानां प्रहरणम् ।।४७।।
महा-मूलाधारोपरि रस-दलं यद् रवि-निभम्,
ततो दिग्-पत्राख्यं ललित-मणि-पूरं तदुपरि ।
हृदम्भोजं मातस्तदुपरि विशुद्धाख्यमपरम्,
ततस्त्वां वै ध्यायन् द्वि-दल-युत-पद्मोपरि-गताम् ।।४८।।
हठाभ्यां संयोगाद् विलसति सुषुम्णाख्य-रमणि!,
तथा सार्द्धं पीत्वाऽमर-मुनि-मनोभ्यर्थित-सुधाम् ।
परां दीपाकारां निखिल - भुवनाधार - जननीम्,
स्मरन्तस्त्वां मातर्भुवन-नमिताः कौल-मुनयः ।।४९।।
त्वदीयं श्री-स्तोत्रं भगवति! महा-मन्त्र-सदनम्,
तथा ते ध्यानाङ्गावरण-नव-मुद्रादि-सहितम् ।
महा - चक्रोद्धारैर्यतमिदमहो साधक - वरः,
पठेद् यः पूजाऽन्ते भुवि भवति स श्री-प्रिय-तरः ।।५०।।

।। श्री श्रीविद्या वृहत्-कर्पूर-स्तोत्रम् ।।

# श्रीत्रिपुर-सुन्दरी पुष्पाञ्जलि-स्तवः

क कल्याण - दात्रि कमनीय - तनु-लते! त्वाम्,
कं चापि कालमनु - चिन्त्य हृदब्ज-मध्ये ।
कामं प्रहर्ष - भरितेन मया तवाद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१।।

ए एतन्मदीय - सु - कृतं परमं पुराणम्,
यत् तवामहं प्रति - दिनं मनसा भजामि ।
साक्षात् - कृतेन तव रूपमनेन चाद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।२।।

ई ईशादि - देव - महनीय - महानुभावे,
दीनं त्विमं भव - भयेन परि - स्फुरन्तम् ।
दीनार्ति - हन्त्रि! दयया परि - पालयाशु,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।३।।

ल लज्जां विहाय बहुधा बहवोऽपि देवाः,
सम्पूजिता जड-धिया न तु कोऽपि हृष्टः ।
लब्धं तवैव रमणीय - वपुर्दृशा मे,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।४।।

ह्रीं ह्रींकार - मन्त्र - निलये! बहुशो भवाब्धौ,
मग्नः परन्तु न कदापि गतोऽस्मि पारम् ।
तत् - तारणे निपुणायोस्त्रिपुरे! मयाऽद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।५।।

ह हस्तेषु पाश - महनीय - सितेक्षु - चापे,
पुष्पास्रमंकुश - वरं ललितं दधाने!
हेमाद्रि - तुङ्ग- तर - शृङ्ग - निवास - शीले,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।६।।

स सर्वेषु देवि! समयेषु गतिस्त्वमेव,
नान्यं कदापि मनसा समनु - स्मरामि ।
सर्वत्र रूपमतुलं तव पश्यताद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।७।।

क कस्ते पुरेशि! विधि - वत्तु समर्हणायाम्,
शक्तः समस्त-परि-बर्ह-युतोऽपि धीमान् ।
हृत् - पङ्कजेन भवतीं भजता मयाऽद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।८।।

ह हन्तातिं - रूक्ष - भव - पावक - शोषितेन,
कुत्राप्यलब्ध - शरणेन सरोज - वक्त्रे!
अन्ते मयाऽत्र भवतीं शरणं गतेन,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।९।।

ल लक्ष्याऽसि देवि! बहु-जन्म-तपो-बलेन,
लक्ष्मीश-धातृ-परिपूज्य पदाम्बु - जाते ।
आलक्ष्य - रूपमरुणं तव विस्मितेन,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१०।।

ह्रीं ह्रीङ्कारमेव शरणं जगतां वदन्ति,
ह्रीङ्कारमेव परमं भुवने रहस्यम् ।
ह्रीङ्कारमेव सततं स्मरता मयाऽद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।११।।

स सर्वस्य देवि! भुवनस्य निदान - भूता,
त्वय्येव सर्वमनघे! विलयं गतं स्यात् ।
सञ्चित्य चैतदधुना त्रिपुरे! मया ते,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१२।।

क कश्चिद् यदा भव-नियन्त्रि! विचिन्तयेत् त्वाम्,
दीनं तदेव हि कटाक्षयसे दृशा त्वम् ।
एवं विचिन्त्य भवतीं स्मरता मयाऽद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१३।।

ल लब्ध्वा त्वदीय चरणाम्बुजमम्ब!
जन्तुर्नावर्तते पुनरपि प्रभवाय लोके ।
वेदोक्तिमेवमसकृत् स्मरता मयाऽद्य,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१४।।

ह्रीं ह्रीङ्कारमेव जपता प्रति - वासरं च,
ह्रीङ्कारमेव भजता सकलेष्ट - सिद्धयै ।
ह्रीङ्कारमेव परमं शरणं गतेन,
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१५।।

श्रीं श्रीङ्कार-मन्त्र-कनकाब्ज-निवास-शीले!
श्री-रूप-धारिणि, शिवे! श्रित-कल्प-वल्लिः ।
श्रीमद् - गुह - स्तुत - महा - विभवे! पुरेशि!
पुष्पाञ्जलिश्चरणयोरयमम्ब! कीर्णः ।।१६।।

★★★

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः॥

# श्रीत्रिपुर-सुन्दर्युपस्थान-सहस्राक्षरी

ऐं नमो भगवति!, त्रिपुर-सुन्दरि!, दुर्गति-तारिणि! क्षमरीं प्रीं कर कर, विसर विसर, नृत्य नृत्य, वद वद, वाग्वादिनि! स्वाहा। ह्रीं नमः, क्लीं नमः, श्रीं प्लीं क्लीं नमः। सुरासुर-वन्दिते!, सकल - जन - क्षोभिणि!, श्रीं श्रीं श्री-कारिणि!, द्रां द्रां द्राविणि!, मों मों मोहिनि!, स्तं स्तं स्तम्भिनि!, आं आं आकर्षिणि!, परम-सुभगे! नमः।

कमल-वासिनि! रस रस वर-वर्तिनि!, ह्रां ह्रां ह्रां-कारि!, ह्रीं ह्रीं ह्रीं-कारि!, ह्रां ह्रां ह्रां-कारिके!, कां कां काकिनि!, रां रां राकिणि!, डां डां डाकिनि!, हां हां हाकिनि!, ऐं शाङ्करि! गन गन, किश किश, भ्रम भ्रम, वद वद, सत्य सत्य, उत उत।

मालिनि!, महा-माये!, तत्त्व-विग्रहे!, अरूपे!, अमले!, विमलेऽजितेऽपराजिते! मर्द मर्द, हर हर, संहर संहर। ॐ ह्रीं ऐं कुरु कुरु, लेप लेप, किटि किटि, ॐ जूं सः, सौः क्लीं ऐं श्रीं नद नद, नाद-बीजे! त्रां त्रीं त्रूं त्रैं त्रौं त्रः, म्रां म्रीं म्रूं म्रैं म्रौं म्रः, ग्रां ग्रीं ग्रूं ग्रैं ग्रां ग्रः, र्रां र्रीं र्रूं र्रैं र्रौं र्रः, ल्रां ल्रीं ल्रूं ल्रैं ल्रौं ल्रः, व्रां व्रीं व्रूं व्रैं व्रौं व्रः, श्रां श्रीं श्रूं श्रैं श्रौं श्रः, ष्रां ष्रीं ष्रूं ष्रैं ष्रौं ष्रः, स्रां स्रीं स्रूं स्रैं स्रौं स्रः, ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, क्षां क्षीं क्षूं क्षैं क्षौं क्षः।

गौरि!, रुद - द्रयिते!, वज्रिणि!, वज्र - नायिके!, कपाल - माला - धरे!, प्रेतासन-निवासिनि!, सर्व-तत्त्वावतारे!, अवतर अवतर, गर्ज गर्ज, शोषय शोषय, सर्व-मन्त्रान् ग्रस ग्रस, सर्व-दुष्टान् मर्द मर्द, सर्व-यन्त्रान् भञ्ज भञ्ज, सर्व-दुःखं तप तप, तापय तापय। तारे!, तारिणि! पर-विद्यां छिन्धि छिन्धि, पर-कायं प्रविश प्रविश, वज्रिणि!

गों गों गोचरि!, खें खें खेचरि!, भूं भूं भूचरि!, हंस-वाहे! हस हस, तिष्ठ तिष्ठ, बन्धय बन्धय, धारय धारय, ऊर्णा-मणिं मोचय मोचय, विमोचय विमोचय, विमोचनि! पश्य पश्य। हुं रावे, मेरु-मन्दर-सङ्काशे!, महा-विद्येश्वरि!, वाचं निर्यच्छ। आच्छादिनि!, सरस्वति!, महा-श्वेते!, किणि-विद्ये!, अर्क-कोटि-सहस्र-मालिनि! पुर पुर, द्रुम द्रुम। अनन्त-क्षोभ-कारिणि! रणे वज्रादि-कर्तरि!, विद्या-विनोदिनि! त्वर त्वर त्वरिते! वह वह, क्रन्दय क्रन्दय, संक्रामय संक्रामय, मदिरानन्द-घूर्णिते!

कामेश्वरि! गां गीं गूं गैं गौं गः । कन्दर्प-मद-विह्वले! स्फुरद्-योनि-चक्रे भगवति!, भग-मालिनि!, ईश्वर-चक्र-कपाल-डमरुक-धारिणि!, महा-भैरवि!, वसु - धारे, वसु - मति, धरिणि, धरे! वशय वशय।

कर्म-धारिणि!, कामेशि! जिह्वया वद वद, मनसा रम रम, क्रन्द क्रन्द, वस वस। बिन्दु-प्रिये! ह्रूं ह्रूं ह्रूं ह्रूं रद रद। शारद-शशाङ्क-निकाशे!, शारदे!, विद्या-दान-विशारदे! क्लीं गण-नायिके!, आनन्द-मय-विग्रहे!, गृहीत-पूर्ण-कपाले!, ज्वलज्जिह्वे!, ह्रादिनि!, नित्य-क्लिन्ने!, मद-द्रवे! स्वाहा।

सौं सौं क्ष्रूं सरस्वत्यै नमः। मदिरे!, मधु - मति!, मदाभोग - सुभगे!, भग-माले! मुरु मुरु, चुरु-चुरु, धुन धुन, स्फुर स्फुर, स्फोटय स्फोटय, घण्टा-रवेण निरन्तर-पर-बल-भेदिनि! फ्रें कुब्जिकायै ह्रां ह्रीं नञणडमे अघोर-मुखि! किणि किणि, विच्चे, ऐं ह्रीं श्रीं फ्रें ह्रीं हुं फट्। सर्वज्ञे! जम्भ जम्भ, जन्म - जरा-मरण-दारिद्र्य-घातिनि!, सर्व - सिद्धि - निधाने!, महा-भय-धारिणि! ॐ हंसः हुं फट् । विद्येश्वरि! ज्रां ज्रीं ज्रूं ज्रैं ज्रौं ज्रः, ल्रीं प्रीं सौः, स्रौं क्षौं। क्षुद्र-विद्राविणि!, विद्रुत-विद्रुम-प्रभे! क्षम्रीं हौंः। चण्डि!, चण्डेश्वरि!, ब्रह्माण्ड-माला - धारिणि!, बन्धूक - शोणाधरे!, त्रैलोक्य सत्ये! नमः, प्रसीद प्रसीद, ऐं श्रीं फ्रें सौः ऐं ह्रीं श्रीं श्रीमहा-त्रिपुर-सुन्दरि! स्वाहा।

।। श्रीत्रिपुर-सुन्दर्युपस्थान-सहस्राक्षरी ।।

★★★

## अपराध-क्षमापण-स्तोत्रम्

किं किं द्वन्द्वं दनुज-दलिनि! क्षीयते न श्रुतायाम् ।
का का सिद्धिः कुल-कमलिनि! प्राप्यते नार्चितायाम् ।।
का का कीर्तिः सुर-वर-नुते! व्याप्यते न स्तुतायाम् ।
कं कं भोगं त्वयि न चिनुते चित्तमालम्बितायाम् ।।
सकुसं सकुसं रम्भ स्वारिता मोक्ष - विभ्रमे!
चिच्चन्द्र - मण्डलान्तःस्थे नमस्ते हर - वल्लभे ।।
जगदुद्धारणोद्योग - योग - भोग - वियोगिनि!
स्थिति-भाव-स्थिते देवि! नमः स्थाणु-प्रियेऽम्बिके ।।
भावाभाव - पृथग् - भानानुभावे वेद - कर्मणि ।
चैतन्य - पञ्चके देवि! नमस्तुभ्यं हराङ्गने ।।
सृष्टि - स्थित्युप - संहार - प्रत्युर्जित - पद - द्वये!
चिद्-विश्रान्ति-महा-सत्ता-मात्रे! मातर्नमोऽस्तु ते ।।

वह्न्यर्क - शीत - किरण - ब्रह्म - चक्रान्तरोदिते!
चतुष्पीठेश्वरि!, शिवे! नमस्ते त्रिपुरेश्वरि! ।।
चराचरमिदं विश्वं प्रकाशयसि तेजसा ।
मातृका - रूपमास्थाय तस्यै मातर्नमोऽस्तु ते ।।
स्मृता भव - भयं! हंसि पूजिताऽसि शुभङ्करि! ।
स्तुता त्वं वाञ्छितं वस्तु ददासि करुणा-वरे ।।
भक्तस्य नित्य - पूजायां रतस्य मम साम्प्रतम् ।
वाग्भवादि - महा - सिद्धिं देहि त्रिपुर-सुन्दरि! ।।
परमानन्द - सन्दोह - प्रमोद - भर - निर्भरे!
दुःख-त्रय-पर - परिम्लान - वदनं पाहि मां शिवे! ।।
शब्द - ब्रह्म - मयि यच्च देवि!, त्रिपुर-सुन्दरि!
यथा - शक्ति जपं पूजां गृहाण मदनुग्रहात् ।।
अज्ञानादल्प - बुद्धित्वादालस्याद् दुष्ट - भावतः ।
ममापराधं कार्पण्यं क्षमस्व पर - देवते! ।।
अज्ञानामसमर्थानामस्वस्थान - निवासिनाम् ।
अशुद्धं बलमस्माकं शिशूनां हर - वल्लभे! ।।
कृपा - मयि! कृपां भद्रे! सकृन्मयि निवेशय ।
तावदऽहं कृतार्थोऽस्मि न ते किञ्चन हीयते ।।
यन्मया क्रियते कर्म जाग्रत् - स्वप्न - सुषुप्तिषु ।
तत्-सर्वं तावकी पूजा भूयाद् भूत्यै रमे! शिवे! ।।
द्रव्य-हीनं क्रिया-हीनं विधि-हीनं च यद् भवेत् ।
तत् - सर्वं कृपया देवि! क्षमस्व पर - देवते! ।।
यन्मयोक्तं महा - ज्ञानं तन्महत् स्वल्पमेव वा ।
तावत् सर्वं जगद्धात्रि! क्षन्तव्यमयमञ्जलिः ।।

।। श्रीत्रिपुरार्णवे अपराध-क्षमापण-स्तोत्रम् ।।

★★★

# 'कौलन्दु' पं० शिवनाथ काटजू

## १०२वीं 'जयन्ती' के पावन अवसर पर

(५ जनवरी, २०११)

## ''शाक्त धर्म''

◈ '**शाक्त धर्म**'–**सार्वजनिक धर्म** है। इसकी साधना में '**जाति**' और '**वर्ण**' का कोई भेद नहीं है। **ब्राह्मण** और **शूद्र** सभी मन्त्र के अधिकारी बन सकते हैं, '**गायत्री**' का अधिकार केवल द्विज मात्र को है, परन्तु '**शाक्त धर्म**' में दरवाजा पूरी तरह सबके लिए खुला है। मूर्ख हो, चाहे पण्डित हो, ब्राह्मण हो, छत्रिय हो, वैश्य हो, शूद्र हो, चाण्डाल हो–**सभी शाक्त-धर्मानुयायी एक समान** हैं। यह धर्म सब अर्थों का प्रदान करनेवाला है। '**शाक्तों के पूजन**' में सभी वर्ण और जाति के लोग एक साथ बैठकर **जगदम्बा का प्रसाद** ग्रहण करते हैं।

◈ '**शाक्त धर्म**' केवल अध्ययन और मनोरञ्जन की वस्तु नहीं है। यह **साधना-मार्ग** न केवल **उपासना** या **पूजा** है, न **प्रार्थना** या **स्तवन** है और न **इष्ट के आगे अपना दुखड़ा रोना** तथा अपने **कर्मों पर पश्चाताप करना** है। अपितु यह साधना '**पुरुष**' **और** '**प्रकृति**' **को एक करने की क्रिया** है, जो शरीर के भीतर '**पुरुष-तत्त्व**' तथा '**मातृ-तत्त्व**' का संयोग करती है और '**सगुण**' को '**निर्गुण**' करने का प्रयास करती है।

◈ '**शाक्त**' यह समझता है कि वह **महा-शक्ति**, जो जगत् को धारण किए हुए है, उसमें भी है। उसकी साधना का लक्ष्य उसी '**महा-शक्ति को जागृत करना**' है, जिससे **स्वराष्ट्र–विराट्** में मिल जाए।

◈ '**सनातन धर्म**' और '**आर्य संस्कृति**' चार स्तम्भों पर खड़ी हैं। वे ये हैं–**१. धर्म, २. अर्थ, ३. काम** और **४. मोक्ष**–'**धर्म**' इन सबका आधारभूत है। जीवन का परम ध्येय '**मोक्ष**' है, परन्तु इस लक्ष्य को सामने रख कर '**अर्थ**' और '**काम**' को ग्रहण करना भी '**धर्म**' ही का सङ्केत है। **कोरे वैराग्य की धारा** में जीवन की नैया नहीं चल सकती।

◈ '**गृहस्थ-धर्म**' ही सब आश्रमों का केन्द्र है। यही **संन्यासी का आश्रय-दाता** और **ब्रह्मचारी का जीवन-दाता** है। यही **समाज की शृंखला** को एक सूत्र में बाँधता है। जब '**गृहस्थ-धर्म**' ही ठुकराया जाएगा, तब **देश** और **समाज** को कौन देखेगा, **राष्ट्र** की कौन रक्षा करेगा? '**शाक्त धर्म**'–'**गृहस्थ-धर्म**' **की प्रधानता** को स्वीकार करता है। वह अपने चारों ओर जो कुछ भी देखता है, उसे उसी **लीला-मयी की लीला** समझता है, जिसकी वह आराधना करता है। वह उसे कोई जाल नहीं प्रतीत होता। उसे वह केवल **ब्रह्म-मयी का भाव** जान पड़ता है, जो '**विद्या**' और '**अविद्या**' के रूप में प्रकट होता है।

◈ '**शाक्त धर्म**' की धारा बहुत पवित्र है। इसका भविष्य भी उज्ज्वल है। हिन्दू समाज की उच्च अवस्था इस **युग-धर्म** के सिद्धान्तों को पहचान कर ही होगी।

रजि० सं० ३२९८१/५७

# श्रीपरा-पूजा-प्रकाश-स्तोत्र

# श्रीसुभगोदय-स्तुति

# श्रीमकरन्द-स्तव-राज

# श्री श्रीविद्या वृहत् कर्पूर-स्तोत्र

# श्रीत्रिपुर-सुन्दरी-पुष्पाञ्जलि-स्तव

# श्रीत्रिपुर-सुन्दर्युपस्थान-सहस्राक्षरी

# श्रीत्रिपुर-सुन्दरी-अपराध-क्षमापण-स्तोत्र

प्रकाशक : परा-वाणी आध्यात्मिक शोध-संस्थान
श्रीचण्डी-धाम, अलोपी-देवी मार्ग, प्रयाग-२११००६

प्रकाशक : श्रीऋतशील शर्मा, श्रीचण्डी-धाम, प्रयाग-६ ☎ ०९४५०२२२७६७